

10

11



5

[illegible]

4

[illegible]

3

[illegible]

2

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]



[illegible]

[illegible]

[illegible]




[illegible]

[illegible]

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]



र उपपद्यते। लृत्वविधानाद्यानि पराणि ऋकार्याणि तानि लृकारे यथा स्युरिति। कानि पुनस्तानि। प्लुतः स्वरितो
द्विर्वचनं। क्लृप्तशिख। प्रक्लृप्तः। क्लृप्तवानिति। यच्चाशक्तिजमसाधुशब्दरूपं तदनुकरणस्यापि साधुत्वमिष्यते। त
स्थस्यापि लृकारस्याकार्यप्रतिपत्त्यर्थमुपदेशः क्रियते। ऋतक इति प्रयोक्तव्ये शक्तिवैकल्यात् कुमार्या लृतक इ
ति प्रयुक्तं। तदन्यो नुकरोति। कुमार्यॢतक इत्याहेति॥ २॥ एओङ्॥ ॥ एओ इत्येतौ वर्णावुपदिश्यान्ते ङकारमि
तं करोति प्रत्याहारार्थं। तस्य ग्रहणं भवत्येकेन। एङि पररूपमित्येकारेण॥ ३॥ ऐऔच्॥ ॥ ऐऔ इत्येतौ वर्णावु
पदिश्य पूर्वांश्चान्ते चकारमितं करोति प्रत्याहारार्थं। तस्य ग्रहणं भवति चतुर्भिः। अचः परस्मिन्पूर्वविधावित्यकारे
ण। इच एकाचोम्प्रत्ययवच्चेतीकारेण। एचोयवायाव इत्येकारेण। वृद्धिरादैजित्यैकारेण। प्रत्याहारेष्वनुबन्धानां
कथमज्ग्रहणेषु न। आचारादप्रधानत्वाल्लोपश्च बलवत्तरः। वर्णेष्वेव वर्णैकदेशा वर्णान्तरसमानाकृतयस्ते
षु तत्कार्यं न भवति। छायानुकारिणो हि ते न पुनस्त एव। पृथक्प्रयत्ननिर्वर्त्यं हि वर्णमिच्छन्त्याचार्याः। वृद्धिधि
लादेशा विनामेषु ऋकारे प्रतिविधातव्या। नुड्विधौ ऋकारग्रहणम्। आनृधतुः। लादेशे ऋकारग्रहण
म्। प्रक्लृप्तः। विनामेषु ऋकारग्रहणं कर्तृणाम्॥ ४॥ हयवरट्॥ ॥ हयवर इत्येतान्वर्णानुपदिश्य पूर्वां
श्चान्ते टकारमितं करोति प्रत्याहारार्थम्। तस्य ग्रहणं भवत्येकेन शश्छोटीत्यकारेण। अर्ये रेफाय कारास्वरू

श्रीमहागणपतये नमः॥ ॥श्रीसरस्वत्यै नमः॥ ॥ॐ॥ ॥इति भाष्ये तथा धातुनामपारायणादिषु॥ विप्रकी
र्णस्य तंत्रस्य क्रियते सारसंग्रहः॥१॥ इष्ट्युपसंख्यानवती शुद्धगणा विवृतगूढसूत्रार्था॥ व्युत्पन्नरूपसिद्धिर्वृ
त्तिरियं काशिका नाम॥२॥ व्याकरणस्य शरीरं परिनिष्ठितशास्त्रकार्यमेतावत्॥ शिष्टः परिकरबंधः क्रियते
ऽस्य ग्रंथकारेण॥३॥ अथ शब्दानुशासनं। केषां शब्दानां लौकिकानां वैदिकानां च। कथमनुशासनं। प्रकृत्यादि
विभागकल्पनया सामान्यविशेषवता लक्षणेन। अथ किमर्थो वर्णानामुपदेशः प्रत्याहारार्थः। प्रत्याहारा
लाघवेन शास्त्रप्रवृत्त्यर्थः॥ ॥अइउण्॥ ॥अइउ इत्यनेन क्रमेण वर्णानुपदिश्यांते णकारमितं करोति
प्रत्याहारार्थं। तस्य ग्रहणं भवत्येकेन उरण्रपर इत्यकारेण। ह्रस्वमवर्णं प्रयोगे संवृतम्। दीर्घप्लुतयोस्तु वि
वृतत्वम्। तेषां सावर्ण्यप्रसिद्ध्यर्थमकार इह शास्त्रे विवृतः प्रतिज्ञायते। तस्य प्रयोगार्थं अ अ इति शास्त्रांते
प्रत्यापत्तिः करिष्यते॥१॥ ॥ऋऌक्॥ ॥ऋऌ इत्येतौ वर्णावुपदिश्य पूर्वांश्चांते ककारमितं करोति प्रत्याहारार्थं।
तस्य ग्रहणं त्रिभिः। अकः सवर्णे दीर्घ इत्यकारेण। इको गुणवृद्धी इतीकारेण। उगितश्चेत्युकारेण। अ
कारादयो वर्णाः प्रकृतप्रयोगविषयास्तेषां शुद्धानामुपदेशः प्रयोजनं। ऌकारस्तु कॢपिस्थ एव प्रयुज्यते। कॢ
पेश्च पूर्वत्रासिद्धमिति लत्वमसिद्धं। तस्यासिद्धत्वात् ऋकार एवाल्कार्याणि भविष्यंतीति किमर्थं ऌका

१

पदिश्यते तस्य परग्रहणेन च ग्रहणे सति स्वर्नयति प्रातर्नयतीत्यत्र यरोऽनुनासिकेऽनुनासिको वेत्यनुनासि
कः प्राप्नोति। मद्रुदो मद्रुदौ इत्यत्र अचो रहाभ्यां द्वे इति द्विर्वचनं प्राप्नोति। कुण्डं रथेन वनं रथेन इत्यत्रा
नुस्वारस्य ययि परसवर्ण इति परसवर्णः प्राप्नोति। नैष दोषः। आकृतौ पदार्थे समुदाये सकृल्लक्ष्ये लक्षणं प्रव
र्तते इत्येतस्मिन् दर्शने। यरोऽनुनासिकेऽनुनासिके वांतरतमो भवतीत्येवमेतत्सवर्तते। तदनेन णकारादीनां उ
कारादयो यथासंस्थानतो गुणतश्चांतरतमास्तौ विहिताः। ये तु न स्थानतो नापि गुणतः स्थानमात्रेण गुण
मात्रेण वांतरतमास्ते सर्वे निवर्तिताः। इति स्थाने सर्वे मात्रांतरतमो रेफस्य णकारो न भवति। द्विर्वचनेऽपि रे
फस्य यरं तत्स्थानीयदेशे सति यत्कार्यं प्राप्तं तत्साक्षाच्छिष्टेन निमित्तभावेन बाध्यत इति तदुच्यते रेफः। अनु
स्वारस्य ययि परसवर्ण इत्येतदप्यनुस्वारांतरतमं सकृदेव परसवर्णं विदधाति। न च रेफस्यानुस्वारांत
रतमः सवर्णोऽस्तीति न भविष्यति कुण्डं रथेनेत्यत्र। अट्सु मध्ये विसर्जनीयजिह्वामूलीयोपध्मानीयानुस्वा
राणामुपदेशः कर्तव्यः। किं प्रयोजनं। उरः केण उरः पेण उरःष्केण उरःष्पेण इत्यत्राड्व्यवायेऽपीति णत्वं
यथा स्यादिति॥५॥ ॥लण्॥ ॥ल इत्येकं वर्णमुपदिश्य पूर्वांश्चांते णकारमितं करोति प्रत्याहारार्थं तस्य
ग्रहणं भवति त्रिभिः। अणुदित्सवर्णस्य चाप्रत्यय इत्यकारेण। इण्कोरितीकारेण। इकोयणचीति णकारेण।

२

इरयग्रहणानि सर्वाण्यनेन णकारेण। अण्ग्रहणानि पूर्वेण अणुदित्सवर्णस्य चाप्रत्यय इत्येतदेकमनेन। अ
दे किमर्थमवूयग्रहणमेव तत्र न क्रियते। नैवं शक्यं। अतस्थानामपि हि सवर्णानां ग्रहणमिष्यते। सय्यंता सव्व
त्सरः तंल्लोकं यंल्लोकमिति। अत्रानुस्वारस्यानुनासिके यि परसवर्णे कृते तस्य यँ यू ग्रहणेन ग्रहणाद्द्वि
र्वचनं यथा स्यादिति। हकारादिषकार उच्चारणार्थः। नानुबंधः। लकारे त्वनुनासिक इत्ययं ज्ञकः प्रतिज्ञायते। ते
न उरण्रपर इति रप्रत्याहारग्रहणं भवति॥६॥ ॥ञमङणनम्॥ ॥ञमङणन इत्येतान्वर्णानुपदिश्य स इ
वँ श्रित्वान्ते मकारमितं करोति प्रत्याहारार्थं तस्य ग्रहणं भवति त्रिभिः। पुमः खय्यम्पर इत्यकारेण हलो यमां
य्स मिलोप इति यकारेण। ङमो ह्रस्वादचि ङमुण्नित्यमिति ङकारेण। अमेताङः इति अकारेणापि ग्रहणम
स्य दृश्यते। केचित्तु सर्वाण्येतानि प्रत्याहारग्रहणानि ञकारेण भवंत्विति मकारानुबंधं प्रत्याचक्षते। तथा स
ति ङमो ह्रस्वादचि ङमुण्नित्यमिमित्यागमामिनोर्भोरभावादागमाभावप्रतिपत्तौ प्रतिपत्तिगौरवं भव
ति॥७॥ झभञ्॥ ॥झभ इत्येतौ वर्णावुपदिश्य पूर्ववँ श्रित्वान्ते ञकारमितं करोति प्रत्याहारार्थं तस्य ग्रहणं भवत्ये
केन। अतो दीर्घो यञीति यकारेण॥८॥ ॥घढधष्॥ ॥घढध इत्येतान्वर्णानुपदिश्य पूर्ववँ श्रित्वान्ते षकारमितं करो
ति प्रत्याहारार्थं तस्य ग्रहणं द्वाभ्यां। एकाचो बशो भष् झषन्तस्य स्ध्वोरिति झकारभकाराभ्यां॥९॥ ॥जबगडदश्॥
॥ ॥जबगडद इत्येतान्वर्णानुपदिश्य पूर्ववँ श्रित्वान्ते शकारमितं करोति। प्रत्याहारार्थं। तस्य ग्रहणं भवति षड्भिः। झो

कारस्य च यथा स्यात्। अदाभ्यां। यद्येवं हयवरडित्यत्र तर्हि किमर्थमुपदिश्यते। अर्हग्रहणेषु हशि चेति हकारस्य
ग्रहणं यथा स्यादिति। महा — हिसन्। देवा हसंति। ब्राह्मणो हसति। हशि चेत्फलं यथा स्यात्। एकस्मान् ङणवटा
द्वाभ्यां षस्त्रिभ्य एव कणमास्युः। ज्ञेयौ चयौ चतुर्भ्यो रः पंचभ्यः शलौ षड्भ्यः॥१४॥ ॥वृद्धिरादैच्॥ ॥वृद्धिशब्दः संज्ञा
त्वेन विधीयते प्रत्येकमादैचां वर्णानां सामान्येन तद्भावितानामतद्भावितानां च। तपरकरणमैजर्थम्। तादपि तौ प
रस्तपर इति। खट्वैडकादिषु त्रिमात्रचतुर्मात्रप्रसंगनिवृत्तये। आश्वलायनः। ऐतिकायनः। औपगवः। औप
मन्यवः। शालीयः। मालीयः। वृद्धिप्रदेशाः। सिचि वृद्धिः परस्मैपदेषु। मृजेर्वृद्धिः। वृद्धिर्यस्याचामादिस्तद्वृद्ध
मित्येवमादयः॥१॥ ॥अदेङ्गुणः॥ गुणशब्दः संज्ञात्वेन विधीयते प्रत्येकमदेङां वर्णानां सामान्येन तद्भाविता
र्थ नामतद्भावितानां च तपरकरणं त्विह सर्वार्थं। तरिता। चेता। स्तोता। पचन्ति। यजन्ति। गुणप्रदेशाः। मिदेर्गुणः। गु
णोऽर्त्तिसंयोगाद्योः? गुणोऽपृक्ते इत्येवमादयः॥२॥ ॥इको गुणवृद्धी॥ परिभाषेयं स्थाननियमार्था। वृद्धिगुणौ। स्वसं
ज्ञया शिष्यमाणौ इक एव स्थाने भवत इति वेदितव्यम्। वक्ष्यति। सार्वधातुकार्धधातुकयोरंगस्य गुण इति। स
इक एव स्थाने वेदितव्या। तरति। नयति। भवति। वृद्धिः खल्वपि। अकार्षीत्। अहार्षीत्। इक इति किम्। आस
न्नव्यंजनानां मा भूत्। यानं। ग्लायति। उम्भितेति। पुनर्गुणवृद्धिग्रहणं स्वसंज्ञाविधाने नियमार्थं। इह मा भूत्
द्यौः। पंथाः। स इमिमेति।॥३॥ ॥न धातुलोप आर्धधातुके॥ धात्वेकदेशो धातुस्तस्य लोपो यस्मिन्नार्धधातुके त

इरयहणानि सर्वाण्यनेन णकारेण। अण्ग्रहणानि पूर्वेण। अणुदित्सवर्णस्य चाप्रत्यय इत्येतदेकमनेन। अ
ये किमर्थमत्र ग्रहणमेव तत्र न क्रियते। नैवं शंक्यं। अतस्थानामपि हि सवर्णानां ग्रहणमिष्यते। सय्यँता सव्व
त्सरः तं ह्लौकंयंल्लौकमिति। अत्रानुस्वारस्यानुनासिके यय्यि परसवर्णे कृते तस्य यँ इत्यनेन ग्रहणाद् द्वि
र्वचनं यथा स्यादिति। हकारादिष्वकार उच्चारणार्थः। नानुबंधः। लकारे त्वनुनासिक इत्संज्ञकः प्रतिज्ञायते। ते
न उरण्रपर इति रप्रत्याहारग्रहणं भवति॥६॥ ॥ञमङणनम्॥ ॥ञमङणन इत्येतान्वर्णानुपदिश्य पू
र्वांश्चांते मकारमितं करोति प्रत्याहारार्थं तस्य ग्रहणं भवति त्रिभिः। पुमः खय्यम्पर इत्यकारेण हलो यमां
यमि लोप इति यकारेण। ङमो ह्रस्वादचि ङमुण्नित्यमिति ङकारेण। अमन्ताड्डः इति मकारेणापि ग्रहणम
स्य दृश्यते। केचित्तु सर्वाण्येतानि प्रत्याहारग्रहणानि ञकारेणाभवंत्विति मकारानुबंधम्प्रत्याचक्षते। तथा स
ति ङमो ह्रस्वादचि ङमुण्नित्यमिमित्यागामिनो झभोरभावादागमाभावप्रतिपत्तेः प्रतिपत्तिगौरवं भव
ति॥७॥ झभञ्॥ ॥झभ इत्येतौ वर्णावुपदिश्य पूर्वांश्चांते ञकारमितं करोति प्रत्याहारार्थं तस्य ग्रहणं भवत्ये
केन। अतो दीर्घो यञीति यकारेण॥८॥ ॥घढधष्॥ ॥घढध इत्येतान्वर्णानुपदिश्य पूर्वांश्चांते षकारमितं करो
ति प्रत्याहारार्थं तस्य ग्रहणं द्वाभ्यां। एकाचो बशो भष् झषन्तस्य स्ध्वोरिति झकारभकाराभ्यां॥९॥ ॥जबगडदश्॥
॥ ॥जबगडद इत्येतान्वर्णानुपदिश्य पूर्वांश्चांते शकारमितं करोति। प्रत्याहारार्थं। तस्य ग्रहणं भवति षड्भिः। भो

कारस्य च यथा स्यात्। अदाभ्यां। यद्येवं हयवरडित्यत्र तर्हि किमर्थमुपदिश्यते। अट्ग्रहणेषु हशि चेति हकारस्य
ग्रहणं यथा स्यादिति। महान् हि सन् हे कौह संति। ब्राह्मणे ह सति। हशि चेत्युत्वं यथा स्यात्। एकस्मान्ङञणवटा
द्वाभ्यां षस्त्रिभ्य एव कणमास्युः। ज्ञेयौ चयौ चतुर्भ्यो रः पंचभ्यः शलौ षड्भ्यः॥१४॥ ॥वृद्धिरादैच्॥ ॥वृद्धिशब्दः संज्ञा
त्वेन विधीयते प्रत्येकमादैचां वर्णानां सामान्येन तद्भावितानां च। तपरकरणमैजर्थम्। तादपि तत्प
रह्रस्वपर इति। खट्वैडकादिषु त्रिमात्रचतुर्मात्रप्रसंगनिवृत्तये। आश्वलायनः। ऐतिकायनः। औपगवः। औप
मन्यवः। शालीयः। मालीयः। वृद्धिप्रदेशाः। सिचि वृद्धिः परस्मैपदेषु। मृजेर्वृद्धिः। वृद्धिर्यस्याचामादिस्तद्वृद्ध
मित्येवमादयः॥१॥ ॥अदेङ्गुणः॥ गुणशब्दः संज्ञात्वेन विधीयते प्रत्येकमदेङां वर्णानां सामान्येन तद्भाविता
नां च तपरकरणं त्विह सर्वार्थं। तरिता। चेता। स्तोता। पचन्ति। यजन्ते। गुणप्रदेशाः। मिदेर्गुणः। गु

थों

णो यङ्लुकोः। गुणोऽपृक्ते इत्येवमादयः॥२॥ ॥इको गुणवृद्धी॥ ॥परिभाषेयं। स्थानिनियमार्था। वृद्धिगुणौ। स्वरा
ल्याक्रियमाणाविक एव स्थाने भवत इति वेदितव्यम्। वक्ष्यति। सार्वधातुकार्धधातुकयोरंगस्य गुण इति। स
इक एव स्थाने वेदितव्या। तरति। नयति। भवति। वृद्धिः खल्वपि। अकार्षीत्। अहार्षीत्। इक इति किम्। आस
ध्यक्षरव्यंजनानां मा भूत्। यानं। ग्लायति। उम्भितेति। पुनर्गुणवृद्धिग्रहणं स्वसंज्ञाविधाने नियमार्थं। इह मा भूत्।
द्यौः पंथाः स इमिमेति॥३॥ ॥न धातुलोप आर्धधातुके॥ धात्वेकदेशो धातुस्तस्य लोपो यस्मिन्नार्धधातुके त

भगो अघो अपूर्वस्य योऽशीत्यकारेण हशि चेति हकारेण। नेड्वशि कृतीति वकारेण। झलां जश् झशीति जकारेण झका
राभ्यां। एकाचो बशो भष् झषन्तस्य स्ध्वोरिति बकारेण ॥१०॥ ॥खफछठथचटतव्॥ ॥खफछठथचटत इत्येतान्व
र्णानुपदिश्यांते वकारमित्तं करोति प्रत्याहारार्थं। तस्य ग्रहणं भवत्येकेन। नश्छव्यप्रशानिति छकारेण खफग्रह
णमुत्तरार्थं ॥११॥ ॥कपय्॥ ॥कप इत्येतौ वर्णावुपदिश्य पूर्वांश्चांते एकारमित्तं करोति प्रत्याहारार्थं तस्य ग्रहणं
भवति चतुर्भिः। अनुस्वारस्य ययि परसवर्ण इति यकारेण मय उञो वो वेति मकारेण। झयो होऽन्यतरस्यामिति
सकारेण। पुमः खय्यम्परे इति खकारेण ॥१२॥ ॥शषसर्॥ ॥शषस इत्येतान्वर्णानुपदिश्य पूर्वांश्चांते रेफमित्तं
करोति प्रत्याहारार्थं तस्य ग्रहणं भवति पंचभिः। यरोऽनुनासिकेऽनुनासिको वेति यकारेण। झरो झरि सवर्णे इति झकारेण। ख
रि चेति खकारेण। अभ्यासे चर्चेति चकारेण। शर्पूर्वाः खय इति शकारेण ॥१३॥ ॥हल्॥ ॥ह इत्येकं वर्णमुपदिश्य
पूर्वांश्चांते लकारमित्तं करोति प्रत्याहारार्थं तस्य ग्रहणं भवति षड्भिः। अलोऽन्त्यात्पूर्व उपधेत्यकारेण। हलोऽनन्तराः
संयोग इति हकारेण। लोपो व्योर्वलीति वकारेण। रलो व्युपधाद्धलादेः संश्चेति रेफेण। झलो झलीति झकारेण। श
ल इगुपधादनिटः क्स इति शकारेण। अथ किमर्थमुपदिष्टोऽपि हकारः पुनरुपदिश्यते। कित्वविकल्पक्त्वे द्विधयो
यथा स्युरिति। स्निहित्वा स्नेहित्वा इत्यत्र रलो व्युपधाद्धलादेः संश्चेति कित्वं वा यथा स्यात्। लिहो लिक्षदिति। शल
इगुपधादनिटः क्स इति क्सो यथा स्यात्। रुदिहि। स्वपिहीति वलादिलक्षण इड्यथा स्यात्। झलंग्रहणेष्वह

दार्द्धधातुलोपं तन्निमित्ते ये गुणवृद्धी प्राप्नुतस्ते न भवतः। लोलुवः। पोपुवः। मरीमृजः। लोलूयादिभ्योऽच्। तेभ्यः पचाद्य
च्विहिते यङोऽचि चेति यङ्लुकि कृते तमेवाचमाश्रित्य ये गुणवृद्धी प्राप्ते तयोः प्रतिषेधः। धातुग्रहणं किम्। ल
न्। लविता। रेड सिपर्णनिम्येत्। अनुबंधप्रत्ययलोपे माभूत्। रिषे हिंसार्थस्य विच्प्रत्ययांतस्योदाहरणं। रेडिति। आ
र्द्धधातुकग्रहणं किं। त्रिधा बद्धो वृषभो रोरवीति। सार्वधातुके माभूत्। इक इत्येव। अभाजि रागः। भंजो आमर्द्दने
इत्यस्माद्धातोः कर्मकर्तरि लुङि च्विणर कृते। भंजेश्च चिणीति नलोपे रूपं ॥४॥ ॥क्ङिति च॥ निमित्तसप्तम्येषा। क्ङि
न्निमित्ते ये गुणवृद्धी प्राप्नुतस्ते न भवतः। चितः। चितवान्। स्तुतः। स्तुतवान्। भिन्नः। भिन्नवान्। ङिति खल्वपि। चि
नुतः। चिन्वंति। मृष्टः। मृजंति। गकारोऽप्यत्र चर्त्वभूतो निर्दिश्यते। ग्लाजिस्थश्च ग्स्नुः। जिष्णुः। भूष्णुः। इक इत्येव। का
म्यते। लैगवायनः। मृजेरजादौ संक्रमे विभाषा वृद्धिरिष्यते। संक्रमो नाम गुणवृद्धिप्रतिषेधविषयः। परिमृ
जंति। परिमार्जंति। परिममृजतुः। परिममार्जतुः। लघूपधस्याप्यत्र निषेधः। अचिनवं अकरवं असुनवमि
त्यादौ लकारस्य सत्यपि ङित्वे यासुटो ङित्वं ज्ञापकं ङिति यत्कार्यं लकारे तन्न भवतीति ॥५॥ ॥दीधीवे
वीटां ॥ दीधीवेव्योरिटश्च ये गुणवृद्धी प्राप्नुतस्ते न भवतः। आदीध्यनं। आदीध्यकः। आवेव्यनं। आवेव्यकः। इ
टः खल्वपि। श्वः कणिता। श्वो रणिता। वृद्धिरिटो न संभवति। लघूपधगुणस्यात्र प्रतिषेधः ॥६॥ ॥हलोऽनन्तराः
संयोगः॥ ॥भिन्नजातीयैरज्भिरव्यवहिताः श्लिष्टोच्चारिता। हलः संयोगसंज्ञा भवंति। समुदायः संज्ञी। जातौ चे

रं। वकुवर्वनं। द्वयोर्बहूनां वा संयोगसंज्ञा सिद्धा भवति। अग्निरिति ग्नौ। अश्व इति श्वौ। कर्ण इति र्णौ। इंद्र इंद्रो
सं इति न्द्राः। उष्ट्रो राष्ट्रं भ्राष्ट्र इति ष्ट्राः। तिलान् स्नाकानि। न सन्तरयाः। तत सन रयाः। दो। हल इति किम्। ति
तउ छत्रं। संयोगांतस्य लोप इति लोपः स्यात्। अनंतरा इति किम्। पचति पनसं। स्कोः संयोगाद्योरिति लोपः स्या
संयोगपदेशाः। संयोगांतस्य लोप इत्येवमादयः॥७॥ ॥ मुखनासिकावचनोऽनुनासिकः॥ ॥ मुखसहितानासि
का मुखनासिका तयोच्चार्य्यते यो वर्णः सोऽनुनासिकसंज्ञो भवति। आङोऽनुनासिकश्छंदसि। अभ्र आँ अपः। ग
भीर आँ उग्रपुत्रो। व्यवन आँ अपः। मुख ग्रहणं किं। अनुस्वारस्यैव हि स्यात्। नासिका ग्रहणं किं। कचट
तपानां मा भूत्। अनुनासिकप्रदेशा आङोऽनुनासिकश्छंदसीत्येवमादयः॥८॥ ॥ तुल्यास्यप्रयत्नं सवर्ण
म्॥ ॥ तुल्यशब्दः सदृशपर्यायः। आस्ये भवमास्यं ताल्वादि स्थानं। प्रयतनं प्रयत्नः। स्पृष्टतादिर्वर्णगुणः। तु
ल्य आस्ये प्रयत्नो यस्य वर्णस्य येन वर्णेन सः समानजातीयं प्रति सवर्णसंज्ञो भवति। चत्वार आभ्यंतराः प्रय
त्नाः सुवर्णसंज्ञायामाश्रीयंते। स्पृष्टता ईषत्स्पृष्टता विवृतता संवृतता च। अअ अ इति त्रयोऽकारा उदात्ता
नुदात्तस्वरिताः प्रत्येकं सानुनासिका निरनुनासिकाश्च ह्रस्वदीर्घप्लुतभेदादष्टादशधाभिद्यंते। तथा इवर्णः
तथा उवर्णः। तथा ऋवर्णः। लृवर्णस्य दीर्घा न संतीति तं द्वादशप्रभेदमाचक्षते। संध्यक्षराणां ह्रस्वा न संति।
तान्यपि द्वादशप्रभेदानि। अंतस्था द्विप्रभेदा रेफवर्जिता यवलाः सानुनासिका निरनुनासिकाश्च। रेफो

तदेवै

म्यत्र। दाडिम्यत्र। मादिति किं। अमुकेऽत्र॥१२॥ ॥ शे॥ ॥ शे इत्येतत्प्रगृह्यसंज्ञं भवति। किमिदं शे इति। यु
ष्मादेशश्छंदसि। न युष्मे वाजबंधवः। अस्मे इंद्राबृहस्पती युष्मे इति। अस्मे इति। त्वे रायो मे रयः। त्वे इति
मे इति। छंदस्येकमुदाहरणम्। अस्मे इंद्राबृहस्पती इति। तत्र तथा पाठात्। इतरत्तु लौकिकमनुकरणं यु
ष्मे इति। अस्मे इति। त्वे इति। मे इति॥१३॥ ॥ निपात एकाजनाङ्॥ ॥ एकश्चासावच् एकाच्। निपात एकाच् आ
ङ् वर्जितः प्रगृह्यसंज्ञो भवति। अ अपेहि। इ इंद्रं पश्य। उ उत्तिष्ठ। आ एवं मन्यसे। आ एवं किल तत्। निपात
इति किं। चकारात्र। एकाजिति किं। प्रागन्येवाचमीरय। अनाङिति किं। आ उदकांतात्। ओदकांतात् प्रियं
पंथमनुव्रजेत्। ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः। एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित्॥१४॥
॥ ओत्॥ ॥ निपात इति वर्तते। तस्यौकारेण तदंतविधिः। ओदंतो निपातः प्रगृह्यसंज्ञो भवति। अहो इति
इति। उताहो इति॥१५॥ ॥ संबुद्धौ शाकल्यस्येतावनार्षे॥ ओदिति वर्तते। संबुद्धिनिमित्तो य ओकारः स शा
कल्यस्य आचार्यस्य मतेन प्रगृह्यसंज्ञो भवति। इतिशब्देऽनार्षे अवैदिके परतः। वायो इति। वायविति। भानो इति। भा
नविति। संबुद्धाविति किं॥ ॥ वृत्त्यर्थमाह। अत्रानुकार्य्यानुकरणयोर्भेदस्याविवक्षितत्वात्। असत्यर्थवत्त्वे प्रा
तिपदिकत्वाभावाद्विभक्तिर्नोत्पद्यते। शाकल्यग्रहणं विभाषार्थं। इताविति किं। पटोऽत्र। अनार्ष इति किम्।
एता गा ब्रह्मबंधविस्यब्रवीत्॥१६॥ ॥ ऊँ ॥ ॥ शाकल्यस्येतावितिवर्तते। ऊँ इति प्रगृह्यसंज्ञो भवति। इत्रौ

क्रा०त्रि०
१

बणां सवर्णा न संति। वर्ग्यैर्वर्ग्यैण सवर्णाः। दण्डाग्रं। खुराग्रं। आस्यग्रहणं किम्। कचटतपानां तुल्यप्रयत्नानां भिन्नस्थानानां माभूत्। किं च स्यात्। तर्प्सति तृर्मिमित्यत्र मूरो मूरि सवर्णे इति तकारेयकारस्य लोपः स्यात्। प्रयत्नग्रहणं किम्। इचुयशानां तुल्यस्थानानां भिन्नप्रयत्नानां माभूत्। किं च स्यात्। अरुश्च्योततीत्यत्र मूरो झरि सवर्णे इति कौशेरस्य चकारे लोपः स्यात्। ऋकारऌकारयोः सवर्णसंज्ञा वक्तव्या। होतृ ऌकारः होतॄकारः। उभयोर्ऌकारस्य वांतरतमः सवर्णो दीर्घो नास्तीति ऋकार एव भवति। सवर्णप्रदेशाः अकः सवर्णे दीर्घ इत्येवमादयः॥ १०॥

॥ नाज्झलौ॥ अच्च हल् च अज्झलौ। अस्यलौ तुल्यास्यप्रयत्नावपि सवर्णसंज्ञौ न भवतः। अवर्णहकारौ दण्ड हलः। इवर्णशकारौ दधि शीतं। सवर्णदीर्घत्वान्न भवति। वैपाशो मत्स्यः। आनडुहं चर्मेति। यस्येति च लोपो न भवति॥ ११॥

॥ ईदूदेद्द्विवचनं प्रगृह्यम्॥ ईत् ऊत् एत् इत्येवमंतं द्विवचनं शब्दरूपं प्रगृह्यसंज्ञं भवति। अग्नी इति। वायू इति। माले इति। पचेते इति। पचेथे इति। ईदूदेदिति किम्। वृक्षावत्र। प्लक्षावत्र। द्विवचनमिति किं। कुमार्य्यत्र। किशोर्य्यत्र। तपरकरणमसंदेहार्थं। प्रगृह्यप्रदेशाः प्लुतः प्रगृह्या अचि नित्यमित्येवमादयः। ईदादीनां प्रगृह्यत्वे मणीवादीनां प्रतिषेधो वक्तव्यः। मणीवोष्ट्रस्य लंबेते प्रियौ वत्सतरौ मम। रोदसीव। दंपतीव। जंपतीव॥ १२॥

॥ अदसो मात्॥ अदसः संबंधी यो मकारस्तस्मात्परे ये ईदूदेतस्ते प्रगृह्यसंज्ञा भवंति। अमी अत्र। अमी आसते। अमू अत्र। अमू आसाते। एकारस्य नास्त्युदाहरणम्। अदस इति किं। शा

शाकल्यस्याचार्यस्य मतेन। शाकल्यस्येति विभाषार्थं। उ इति विति॥ १३॥

॥ ऊँ॥ उञ इति वर्तते। उञ इतः वनार्षे ऊँ अयमादेशो भवति। दीर्घोनुनासिकः प्रगृह्यसंज्ञकश्च। शाकल्यग्रहणं विभाषार्थं। इहाप्यनुवर्तते तेन त्रीणि रूपाणि भवंति। उ इति विति। ऊँ इति॥ १४॥

॥ ईदूतौ च सप्तम्यर्थे॥ शाकल्यस्येत्यावनार्षे इति निवृत्तौ ईदंतमूदंतं च सप्तम्यर्थे वर्तमानं प्रगृह्यसंज्ञं भवति। अध्यस्यां मामकी तनू। मामक्यां तन्वामिति प्राप्ते। मामक्यां। मामकी इति। तन्वां तनू इति। सोमो गौरी अधिश्रितः। ईदूतौ विति किं। प्रियः सूर्ये प्रियो अग्ना भवाति। अग्नि शब्दस्यास्मात्प्याडादेशः। सप्तमीग्रहणं किं। धीती। मती। सुष्टुती। धीत्या। मत्या। सुष्टुत्या। इति प्राप्ते। अर्थग्रहणं किं। वाप्यश्वो नद्यातिः। तपरकरणमसंदेहार्थं। ईदूतौ सप्तमीत्येव लुप्तेर्थग्रहणं क्रियेत। पूर्वस्य चेत्सवर्णो साववाडामूभावः प्रसज्येते। वचनाद्यत्र दीर्घत्वं तत्रापि सरसीयदि। ज्ञापकं स्यात्तदंतत्वे मा वा पूर्वपदस्य भूत्॥ १५॥

॥ दाधा घ्वदाप्॥ रूपाश्चत्वारो धातवः। धारूपौ च द्वौ घुसंज्ञौ भवतः। दाप्दैपौ वर्ज्जयित्वा। डुदाञ् दाने। प्रणिददाति। दाण् दाने। प्रणियच्छति। दो। प्रणिद्यति। देङ्। प्रणिदयते। डुधाञ्। प्रणिदधाति। धेट्। प्रणिधयति। वत्सो मातरं। अदाप् इति किं। दाप् लवने। दातं बर्हिः। दैप् शोधने। अवदातं मुखं। घुप्रदेशाः दनो र्नेर्गदनपतपदघुमास्थागापाजहातिसां हलि। पतपदघुमास्यतीत्येवमादयः॥ २०॥

॥ आद्यन्तवदेकस्मिन्॥ असहायस्याद्यंतोपदिष्टानि कार्याणि न सिध्यंतीत्ययमतिदेश आरभ्यते

सप्तम्यर्थे वर्तते। आदावेकान्त इव एकस्मिन्नपि कार्यं भवति। यथा कर्तव्यमित्यत्र प्रत्ययाद्युदात्तत्वं भवति।
एवं औपगवमित्यत्रापि यथा स्यात्। यथा वृक्षाभ्यामित्यत्राङ्गान्ते दीर्घत्वं भवति। एवमाभ्यामित्यत्रापि यथा
स्यात्। यथा वृक्षाभ्यामित्यत्र एकस्मिन्निति किं। सभासन्नयने भवः साभासन्नयनः। आकारमाश्रित्य वृद्ध
संज्ञा न भवति॥ २१॥ ॥ तरप्तमपौ घः॥ ॥ तरप्तमपावित्येतौ प्रत्ययौ घसंज्ञौ भवतः। कुमारितरा। कुमारितमा।
ब्राह्मणितरा। ब्राह्मणितमा। घप्रदेशाः तरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्व इत्येवमाद
यः॥ २२॥ ॥ बहुगणवतुडति संख्या॥ ॥ बहुगण वतु डति इत्येते संख्यासंज्ञा भवन्ति। बहुकृत्वः। बहुधा।
बहुशः। बहुकः। गणकृत्वः। गणकः। गणधा। गणशः। तावच्छः। तावत्कः। तावद्धा। तावत्कृत्वः। कतिकृत्वः।
कतिकः। कतिधा। कतिशः। बहुगणशब्दयोर्वैपुल्ये संघे च वर्तमानयोरिह ग्रहणं नास्ति। किं तु संख्यावाचिनो
रेव। भूर्यादीनां निवृत्त्यर्थं संख्यासंज्ञा विधीयते। अर्द्धपूर्वपदश्च पूरणप्रत्ययांतः संख्यासंज्ञो भवतीति व
क्तव्यम्। समासकन्विध्यर्थम्। अर्द्धपंचमशूर्पं। अर्द्धपंचमकं। संख्याप्रदेशाः संख्यायाः क्रियाभ्यावृत्तिग
णने कृत्वसुजित्येवमादयः॥ २३॥ ॥ ष्णान्ता षट्॥ ॥ स्त्रीलिंगनिर्देशात् संख्येति संबध्यते। षकारांता नका
रांताश्च संख्या षड् भवति। षकारांता। षट्। नकारांता। पंच। नव। दश। अंतग्रहणं किं। औपदेशिकार्थं। तेने
ह न भवति। शतानि। सहस्राणि। अष्टानामित्यत्र नुड् भवति। षट्प्रदेशाः। षड्भ्यो लुगित्येवमादयः॥ २४॥

षट्संज्ञा

समासो दिक्समासः। दिगुपदिष्टे समासे बहुव्रीहौ सर्वादीनि विभाषा सर्वनामसंज्ञानि भवंति। उत्तरपूर्वस्यै। उत्तर
पूर्वायै। दक्षिणपूर्वस्यै। दक्षिणपूर्वायै। दिग्ग्रहणं किं। न बहुव्रीहाविति प्रतिषेधं वक्ष्यति। तत्र न ज्ञायते क्व विभा
षा क्व प्रतिषेध इति दिग्ग्रहणे पुनः क्रियमाणे ज्ञायते। दिगुपदिष्टे समासे विभाषा। अन्यत्र प्रतिषेध इति। समा
सग्रहणं किं। समास एव बहुव्रीहिस्तत्र विभाषा यथा स्यात्। बहुव्रीहिवद्भावेन यो बहुव्रीहिस्तत्र माभूत्। अबाधे
नेति बहुव्रीहिवद्भावः। दक्षिणदक्षिणस्यै देहि। बहुव्रीहाविति किं। द्वन्द्वे विभाषा माभूत्। दक्षिणोत्तरपूर्वाणामि
ति॥ २८॥ ॥ न बहुव्रीहौ॥ ॥ सर्वनामसंज्ञायां तदंतविधेरभ्युपगमाद् बहुव्रीहेरपि सर्वाद्यंतस्य संज्ञा स्यादिति प्र
तिषेध आरभ्यते। बहुव्रीहौ समासे सर्वादीनि सर्वनामसंज्ञानि न भवंति। प्रियसर्वाय। प्रियविश्वाय। प्रियोभया
य। द्व्यन्याय। त्र्यन्याय। इह च त्वत्कपितृकः मत्कपितृक इत्यत्राकच् माभूदिति। बहुव्रीहाविति वर्तमाने पुनर्बहुव्रीहि
ग्रहणं भूतपूर्वमात्रेऽपि प्रतिषेधो यथा स्यात्। वस्त्रान्तरवसनान्तरा इति॥ २९॥ ॥ तृतीयासमासे॥ ॥ तृतीयास
मासे सर्वादीनि सर्वनामसंज्ञानि न भवंति। मासेन पूर्वाय। अहः पूर्वाय। समास इत्यनुवर्तमाने पुनः समासग्रह
णं तृतीयासमासार्थे वाक्येऽपि प्रतिषेधो यथा स्यात्। मासेन पूर्वाय। संवत्सरेण पूर्वाय। पूर्वसदृशसमोनार्थक
लहनिपुणमिश्रश्लक्ष्णैरिति तृतीयासमासः प्रतिपदं वक्ष्यते। तस्येदं ग्रहणं न यस्य कस्यचित् तृतीयासमासस्य
कर्तृकरणे कृता बहुलमिति। त्वयका कृतं। मयका कृतं। तृतीयमिति॥ ३०॥ ॥ द्वन्द्वे च॥ ॥ द्वन्द्वे समासे वर्तमानानि स

षट्

काशि०
१
७

॥ ॥डति च॥ ॥डत्यंता संख्या संज्ञा भवति। कति तिष्ठंति। कति पश्य॥ ॥२५॥ ॥क्तक्तवतू निष्ठा॥ ॥क्तश्च क्तव-
तुश्च क्तवतू इत्येतौ प्रत्ययौ निष्ठासंज्ञौ भवतः। कृतः। कृतवान्। ककारः कित्कार्यार्थः। भुक्तः। भुक्तवान्। उकार
उगित्कार्यार्थः। निष्ठाप्रदेशाः श्वीदितो निष्ठायामित्येवमादयः॥२६॥ ॥सर्वादीनि सर्वनामानि॥ ॥सर्वशब्द आ-
दिर्येषां तानीमानि सर्वादीनि सर्वनामसंज्ञानि भवंति। सर्वः। सर्वौ। सर्वे। सर्वस्मै। सर्वस्मात्। सर्वस्मिन्। सर्वेषां।
सर्वकः। सर्व। विश्व। उभ। उभय। शब्दस्य सर्वनामत्वे प्रयोजनं सर्वनाम्नस्तृतीया चेति। उभयः। उभये। उभयेषां।
उभयस्मिन्। डतर। डतम। कतरस्मै। कतमस्मै। इतर। अन्य। अन्यतर। इतरस्मै। अन्यस्मै। अन्यतरस्मै। त्वत्
ति। त्वशब्दोयमन्यवाचीस्वरभेदात् द्विः पठितः। एकोत्र उदात्तः द्वितीयोऽनुदात्तः। केचित्तु तकारांतमेकं पठंति
त्वदिति द्वावपि त्वानुदात्तौ इति स्मरंति। नेम। नेमस्मै। वक्ष्यमाणेन जसि विभाषा भवति। नेमे। नेमा इति। स
मः। समस्मै। कथं यथासंख्यमनुदेशः समानां। समे देशे यजेतेति। समस्य सर्वशब्दपर्यायस्य सर्वनाम
संज्ञेष्यते। न सर्वत्र। सिम। सिमस्मै। पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्। स्वम
ज्ञातिधनाख्यायाम्। अंतरं बहिर्योगोपसंव्यानयोः। त्यद्। तद्। यद्। इदम्। अदस्। एक। द्वि। युष्मद्।
अस्मद्। किं। भवत्। सर्वादिः। सर्वनामप्रदेशाः सर्वनाम्नः स्मै इत्येवमादयः॥२७॥ ॥विभाषा दिक्समासे
बहुव्रीहौ॥ ॥न बहुव्रीहाविति प्रतिषेधं वक्ष्यति। तस्मिन्नित्ये प्रतिषेधे प्राप्ते विभाषेयमारभ्यते॥ दिङ्ग

७

काशि०
१
८

र्वादीनि सर्वनामसंज्ञानि न भवंति। पूर्वापराधराणां कतरकतमानां॥३१॥ ॥विभाषा जसि॥ ॥पूर्वेण प्रतिषेधे नित्ये प्रा
प्ते विभाषेयमारभ्यते। द्वंद्वे समासे सर्वादीनि जसि विभाषा सर्वनामसंज्ञानि भवंति। कतरकतमे। कतरकतमाः॥
जसः कार्यं प्रति विभाषा ऽक — न भवति। कतरकतमः॥३२॥ ॥प्रथमचरमतयाल्पार्धकतिपयनेमाश्च॥ ॥वि
भाषा जसीत्यनुवर्त्तते द्वंद्वे चेति निवृत्तं। प्रथम चरम तय अल्प अर्ध कतिपय नेम इत्येते शब्दा जसि विभाषा स
र्वनामसंज्ञा भवंति। प्रथमे। प्रथमाः। चरमे। चरमाः। द्वितये। द्वितयाः। अल्पे। अल्पाः। अर्धे। अर्धाः। कतिपये। कतिप
याः। नेमे। नेमाः। तय इति तयप्प्रत्ययः। शिष्टानि प्रातिपदिकानि। तत्र नेम इति सर्वादिषु पठ्यते। तस्य प्राप्ते विभाषा
अन्येषामप्राप्ते। उभयशब्दस्य तयप्प्रत्ययांतस्य गणे पाठान्नित्या सर्वनामसंज्ञा। इहापि जस्कार्यं प्रति
विभाषा। काकचोर्यथायोगं वृत्तिः॥३३॥ ॥पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्॥ ॥
पूर्व पर अवर दक्षिण उत्तर अपर अधर इत्येतेषां गणे पाठात् पूर्वेण नित्यायां सर्वनामसंज्ञायां प्राप्तायां जसि वि
भाषेयमारभ्यते। पूर्वादीनि जसि विभाषा सर्वनामसंज्ञानि भवंति। व्यवस्थायामसंज्ञायां। स्वाभिधेयापेक्षावधि
नियमो व्यवस्था। पूर्वे। पूर्वाः। परे। पराः। अवरे। अवराः। दक्षिणे। दक्षिणाः। उत्तरे। उत्तराः। अपरे। अपराः। अध
रे। अधराः। व्यवस्थायामिति किम्। दक्षिणा इमे गायकाः प्रवीणा इत्यर्थः। असंज्ञायामिति किं। उत्तराः कुरवः।
सत्यामेव व्यवस्थायामियं तेषां संज्ञा॥३४॥ ॥स्वमज्ञातिधनाख्यायां॥ ॥अत्रापि नित्या सर्वनामसंज्ञा प्राप्ता

८

जसि विभाष्यते। स्वमित्येतच्छब्दरूपं जसि विभाषा सर्वनामसंज्ञं भवति। न चेज्ज्ञातिधनयोः संज्ञारूपेण वर्तते। स्वे
पुत्राः स्वाः पुत्राः। स्वे गावः। स्वा गावः। आत्मीया इत्यर्थः। ज्ञातिप्रतिषेधः किम्। धूमायंत इव ज्ञातिगणाः प्रज्वलंती
वसंगताः। उल्मुकानीव भांति स्वा ज्ञातयो भरतर्षभ। स्वा ज्ञातय इत्यर्थः। अधनाख्यायामिति किं। प्रभूतास्वा
न दीयते प्रभूतास्वान भुंजते। प्रभूता निधनानीत्यर्थः॥ ॥२९॥ ॥अंतरं बहिर्योगोपसंव्यानयोः॥ ॥ अत्रापि
पूर्वेण नित्या सर्वनामसंज्ञा प्राप्ता जसि विभाष्यते अंतरमित्येतच्छब्दरूपं जसि विभाषा सर्वनामसंज्ञं भवति
बहिर्योगे उपसंव्याने च गम्यमाने। अंतरे गृहाः अंतरा गृहाः। नगरबाह्या श्वांडालगृहा उच्यंते। अंतरे शा
टकाः अंतराः शाटकाः। उपसंव्यानं परिधानीयमुच्यते न प्रावरणीयम्। बहिर्योगोपसंव्यानयोरिति किम्।
अनयोर्ग्रामयोरंतरे तापसाः प्रतिवसंति। अस्मिन्नंतरे शीतान्युदकानि। मध्यप्रदेशवचनो ऽत्र शब्दः। गण
सूत्रस्य चैतत्प्रत्युदाहरणम्। अपुरीति वक्तव्यम्। अंतरायां पुरि वसति सः। विभाषाप्रकरणे तीयस्य वा
ङित्सूपसंख्यानम्। द्वितीयस्मै। द्वितीयाय। तृतीयाय। तृतीयस्मै॥ ॥३०॥ ॥स्वरादिनिपातमव्ययम्॥ ॥ स्वरा
दीनि शब्दरूपाणि निपाताश्चाव्ययसंज्ञाश्च भवंति। स्वर्। अंतर्। प्रातर्। एते अंतोदात्ताः पठ्यंते। पुनरित्याद्यु
दात्ताः। सनुतर्। उच्चैस्। नीचैस्। शनैस्। ऋते। ऋधक्। युगपत्। आरात्। पृथक्। एतेऽपि सनुतर् प्रभृतयो
तोदात्ताः पठ्यंते। ह्यस्। श्वस्। दिवा। रात्रौ। सायं। चिरं। अथो। मनाक्। ईषत्। जोषं। तूष्णीं। बहिस्। आविस्।

शित्सर्वस्य॥ ॥ अनेकाल् आदेशः शिच्च सर्वस्य षष्ठीनिर्दिष्टस्य स्थाने भवति। अस्तेर्भूः। भविता। भवितव्यं। भ
वितुं। शिदप्यल्पि। जश्शसोः शिः। कुंडानि तिष्ठंति। कुंडानि पश्य॥५५॥ ॥स्थानिवदादेशोऽनल्विधौ॥ ॥स्था
न्यादेशयोः पृथक्त्वात्स्थान्याश्रयं कार्यमादेशो न प्राप्नोतीत्ययमतिदेश आरभ्यते। स्थानिना तुल्यं वर्तत इति
स्थानिवत् स्थानिवदादेशो भवति। स्थान्याश्रयेषु कार्येष्वनलाश्रयेषु सत्सु स्थान्यलाश्रयाणि कार्याणि
वर्जयित्वा। किमुदाहरणम्। धात्वंगकृत्तद्धिताव्ययसुप्तिङ्पदादेशाः प्रयोजनं। धात्वादेशो धातुवद्भवति।
अस्तेर्भूः। ब्रुवो वचिः। आर्द्धधातुकविषये प्रागेवादेशेषु कृतेषु धातोरिति तव्यदादयो भवंति। भविता। भवितुं। भ
वितव्यं। वक्ता। वक्तुं। वक्तव्यम्। अंगादेशो ऽंगवद्भवति। केन। काभ्यां। कैः। किमः कादेशे कृते अंगाश्रया इन दीर्घ
त्वैस्भावा भवंति। कृदादेशः कृद्वत्। प्रकृत्य। प्रहृत्य। ल्यबादेशे कृते कृत्यस्य पिति कृति तुगिति तुग्भवति। तद्धि
तादेशस्तद्धितवद्भवति। दाधिकं। अद्यतनं। कृत्तद्धितसमासाश्चेति प्रातिपदिकसंज्ञा भवति। अव्ययादेशोऽव्यय
वद्भवति। प्रस्तुत्य। उपस्तुत्य। ल्यप् अव्ययादाप्सुप इति सुपो लुग्भवति। सुबादेशः सुब्वद्भवति। वृक्षाय। प्लक्षाय।
सुपि चेति दीर्घत्वं भवति। तिङादेशस्तिङ्वद्भवति। अकुरुतां। सुप्तिङंतं पदमिति पदसंज्ञा भवति। पदादेशः प
दवद्भवति। ग्रामो नः स्वं। जनपदो नः स्वं। पदस्येति रुत्वं भवति। वत्करणं किं। स्थानी आदेशस्य संज्ञा मा विज्ञायी
ति स्वाश्रयमपि यथा स्यात्। आङो यमहनः। आहत। आवधिष्ट इति। आत्मनेपदमुभयत्रापि भवति। आदेशाय

अवस्। अधस्। निकषा। समया। स्वयं। मृषा। नक्तम्। नञ्। हेतौ। अद्धा। इद्धा। सामि। वत्। ईकम्। सायमादयो
ऽतोदात्ताः पठ्यंते। वदुवत्संतमव्ययसंज्ञं भवति। ब्राह्मणवत्। क्षत्रियवत्। सना। उपधा। सनत्। सनात्। निर
स्। एते आद्युदात्ताः। अंतरा अयं मंतोदात्तः। अंतरेण। साकं। ज्योक्। कं। शं। सहसा। सदा। विना। नाना। स्व
स्ति। स्वधा। अलं। वषट्। अन्यत्। अस्ति। उपांशु। क्षमा। विहायसा। दोषा। मिथ्या। मुधा। वृथा। क्त्वातोसुन्कसु
नः। कृन्मकारांतः संध्यक्षरांतो अव्ययीभावश्च। पुरा। मिथो। मिथस्। प्रबाहुकं। आर्यहलं। अभीक्ष्णं। सा
कं। साद्धं। मनस्। हिरुक्। तसिलादिस्तद्धित एवंधाच्पर्यंतः। कृत्वसुच्। सुच्। शस्तसी। आस्थालो। अर्थाश्च।
अम्। आम्। मा। माङ्। आ। प्रतान्। प्रशान्। इति स्वरादिनिपातावक्ष्यंते। प्राग्रीश्वरान्निपाता इति। च। वा
ह। अह। एवमादयः। अव्ययप्रदेशाः। अव्ययादाप्सुप इत्येवमादयः। सदृशं त्रिषु लिंगेषु सर्वासु च विभ
क्तिषु। वचनेषु च सर्वेषु यन्न व्येति तदव्ययं॥ ३७॥ ॥ तद्धितश्चासर्वविभक्तिः॥ ॥ तद्धितांतः शब्दो ऽसर्ववि
भक्तिरुक्तो ऽव्ययसंज्ञो भवति। यस्मात्सर्वा विभक्तयो नोत्पद्यंते सो ऽसर्वविभक्तिः। अतः। यतः। ततः। तत्र।
यत्र। तदा। यदा। कदा। सर्वदा। सदा। तद्धित इति किं। एकः। द्वौ। बहवः। असर्वविभक्तिरिति किं। औपगवः।
औपगवौ। औपगवाः॥ ३८॥ ॥ कृन्मेजंतः॥ ॥ कृद्यो मकारांत एजंतश्च तदंतं शब्दरूपमव्ययसंज्ञं भवति
स्वादुंकारं भुंक्ते। संपन्नं भुंक्ते। लवणंकारं भुंक्ते। एजंतः। वक्षे रायः। ता वामेषे रथानां। क्रत्वे दक्षाय जीवसे।

हणं किम्। आनुमानिकस्याप्यादेशस्य स्थानिवद्भावो यथा स्यात्। एकः। पचतु। अनल्विधाविति किं। द्युपथित्य
दादेशान स्थानिवद्भवंति। द्यौः। पंथाः। स इति। हल्ङ्याब्भ्य इति सुलोपो न भवति॥ ५६॥ ॥ अचः परस्मिन्पूर्वविधौ॥॥
आदेशः स्थानिवदिति वर्तते। अच इति स्थानिनिर्देशः। परस्मिन्निति निमित्तसप्तमी। पूर्वविधाविति विषयसप्त
मी। अजादेशः परनिमित्तकः पूर्वस्य विधौ विषये कर्तव्ये स्थानिवद्भवति। पटयति। लघयति। अवधीदिति।
अतो लोपस्य स्थानिवद्भावादतो हलादेर्लघोरिति हलादिलक्षणा विभाषा वृद्धिर्न भवति। बहुखट्वकः। आपो
न्यतरस्यामिति ह्रस्वस्य स्थानिवद्भावात्। ह्रस्वांतेंत्यात्पूर्वमिति स्वरो न भवति। अच इति किं। प्रश्नः। आक्राष्ट।
आगत्य। प्रश्न इति प्रच्छेर्नङ् प्रत्यये छ्वोः शूडनुनासिके चेति छकारस्य शकारः परनिमित्तकस्तु किं कर्तव्ये न स्थानि
वद्भवति। आक्राष्टमिति झलो झलीति सिचो लोपः स्यां परनिमित्तकः कृषेः सिज्विकल्पेनोपसंख्यानात् कृषेः षकार
स्य षढोः कः सीति ककारे कर्तव्ये न स्थानिवद्भवति। आगत्येति वा ल्यपि त्य नुंक्लोपः परनिमित्तकस्तु किं कर्तव्ये न
स्थानिवद्भवति। परस्मिन्निति किं। युवजानिः। वैयाघ्रपद्यः। आदीध्ये। जायाया निङ् परनिमित्तकः। तेन य
लोपे न स्थानिवद्भवति। वैयाघ्रपद्य इति। न परनिमित्तकः पादस्यांतलोपः। यलोपं न प्रतिबध्नाति। आदीध्ये इ
ति दीधी ङ-उत्तमपुरुषैकवचने टेरेत्वस्य परनिमित्तकत्वात् यीवर्णयोर्दीधीवेव्योरिति लोपो न भवति। पू
र्वविधाविति किं। हे गौः। बाभ्रवीयाः। नैधेयः। हे गौरिति वृद्धिरजादेशः परनिमित्तकः संबुद्धिलोपे कर्तव्ये न स्था

निवद्भवति। बाभ्रव्यस्यामी छात्रा इति वृद्धाच्छः। हलस्तद्धितस्येति यलोपे कर्तव्येऽवादेशो न स्थानिवद्भव
ति। नैधेयः। आतो लोप इटि चेत्याकारलोपः। इतश्चानिञ इति ढग्लक्षणे प्रत्ययविधौ न स्थानिवद्भवति
॥ ५७ ॥ ॥ न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु ॥ ॥ पूर्वेणातिप्रसक्तः स्थानिवद्भा
वः एतेषु विधिषु प्रतिषिध्यते। तत्र तावत्पदान्तविधिं प्रत्यजादेशो न स्थानिवद्भवति। कौ स्तः। यौ स्तः। तानि संति। यानि
संति। श्नसोरल्लोपः क्ङिति सार्वधातुके इति परनिमित्तकः स पूर्वविधावाकादेशो यणादेशश्च कर्तव्ये स्थानिवत्स्यात्।
अस्माद्वचनान्न भवति। द्विर्वचनविधिं प्रति न स्थानिवत् तद्यथा दध्यत्र। मध्वत्र। यणादेशः परनिमित्तकस्तस्य
स्थानिवत्त्वादनचि चेति धकारस्य द्विर्वचनं न स्यात्। अस्माद्वचनाद्भवति। वरे। वरेयोऽजादेशः स पूर्वविधिं प्रति न स्था
निवत्। अश्रुयायावरः प्रवपेत पिंडान्। यातेर्यङ् तस्य यश्च यङ इति वरचि कृतेऽतो लोपः परनिमित्तकः तस्य स्था
निवत्त्वादातो लोप इटि चेत्याकारलोपः स्यात्तदस्माद्वचनान्न भवति। यलोपः। वलोपविधिं प्रति न स्थानिवद्भव
ति। कंडूतिः। कंडूयतेः क्तिनि कृतेऽतो लोपः परनिमित्तको लोपो व्योर्वलीति यलोपे कर्तव्ये स्थानिवत्स्यात्तदस्माद्वच
नान्न भवति। स्वरः। स्वरविधिं प्रति न स्थानिवद्भवति। चिकीर्षको ति दीर्षकः। ण्वुल्तृचाविति कृतेऽतो लोपः परनि
मित्तकः। लिति प्रत्ययात्पूर्वमपि ङ्वात स्वरे कर्तव्ये न स्थानिवद्भवति। ईकारे स्वरः। सवर्णः। सवर्णविधिं प्रति न स्थानिव
त्। शिण्ढि। पिण्ढि। शिषेः पिषेश्च लोण्मध्यमपुरुषैकवचने रुधादिभ्यः श्नम्। हिलधित्व ष्टुत्व जश्त्वेषु कृते लु

त्वं। अक्षन्निति अदेर्लुङि बहुवचने घस्लादेशः। क्लेरागतस्य मंत्रे घसह्वरणेति लुक्। गमहनजनखनघसामित्यु
पधालोपः। तस्य स्थानिवत्त्वात्खरि चेति घकारस्य चर्त्वं न स्यात्तदस्माद्वचनाद्भवति। स्वरदीर्घयलोपेषु लोपाजा
देशो न स्थानिवद्भवति। अन्यत्र स्थानिवदेव। तेन वकुरवद्व कः। किर्योः। गिर्योः। वा य्वोरिति स्थानिवत्त्वात्स्वरदीर्घ
यलोपा न भवंति ॥ ५८ ॥ ॥ द्विर्वचनेऽचि ॥ ॥ द्विर्वचननिमित्तेऽचि परे अजादेशः स्थानिवद्भवति द्विर्वचन एव कर्तव्ये।
रूपातिदेशश्च। यन्नियतकालः। कृते द्विर्वचने पुनरादेशरूपमेवावतिष्ठते। आल्लोपोपधालोपणिलोपयणय
वायावादेशाः प्रयोजनं। आल्लोपः। पपतुः। पपुः। आतो लोप इटि चेत्याकारलोपे कृते तस्य स्थानिवद्भावादे
काच् इति द्विर्वचनं भवति। उपधालोपः। जघ्नतुः। जघ्नुः। गमहनजनखनघसामित्युपधालोपे कृतेऽनच्कत्वा
त् द्विर्वचनं न स्यात्। अस्माद्वचनाद्भवति। णिलोपः। आटिटत्। अटतेर्णिचि लुङि चङि णिलोपे कृते तस्य स्था
निवद्भावादजादेर्द्वितीयस्येति टिशब्दस्य द्विर्वचनं भवति। यणः। चक्रतुः। चक्रुः। करोतेरतुसि उसि च यणादे
शे कृतेऽनच्कत्वात् द्विर्वचनं न स्यात्स्थानिवद्भावाद्भवति। अयवायावादेशाः। निनय। लुलव। निनाय। लुलाव। ने
नयतेर्लुनातेश्च णलि गुणे वृद्धौ च कृतायां अयवायावादेशास्तेषां स्थानिवत्त्वान्नेने लोलो इति द्विर्वचनं
न भवति। द्विर्वचन एव कर्तव्ये इति किं। जग्लौ। मम्लौ। श्रवणमाकारस्य न भवति। परे णस ह वृद्धिरेचीति वृद्धिर्न
भवति। द्विर्वचननिमित्त इति किं। दुद्यूषति। ऊटि यणादेशो न स्थानिवद्भवति। अज्वीति किं। जे प्रीयते। दे

१३

श्नसोरल्लोपः क्ङिति सार्वधातुके परनिमित्तकः। अनुस्वारस्य ययि परसवर्णे कर्त्तव्ये न स्थानिवद्भवति। ततो म्रोन
म्रीति ङकारलोपः। अनुस्वारः। अनुस्वारविधिं प्रति न स्थानिवत्। शिंषंति। पिंषंति। नश्चापदांतस्य झल्यनुस्वारे
कर्तव्ये श्नसोरल्लोपो न स्थानिवद्भवति। दीर्घः। दीर्घविधिं प्रति न स्थानिवद्भवति। प्रतिदीव्ना। प्रतिदीव्ने। प्रतिदिव
न्नित्येतस्य भस्येत्यधिकृत्य तृतीयैकवचने चतुर्थ्येकवचने च अल्लोपोऽन इत्यकारलोपः परनिमित्तकस्तस्य स्था
निवद्भावाद्धलि चेति दीर्घत्वं न स्यात्। नह्ययं वकारो हल्पर इत्यस्माद्वचनाद्भवति। जश्त्वम्। जश्त्वविधिं प्र
ति न स्थानिवत्। सग्धिश्च मे सपीतिश्च मे। बब्धां ते हरी धानाः। अदेः क्तिनि बहुलं छन्दसीति घस्लादेशः। घसि
भसोर्हलि च इत्युपधालोपः। झलो झलीति सकारलोपः। झषस्तथोर्धोऽध इति धत्वं। उपधालोपस्य स्थानिवत्वा
त् झलां जश् झशीति घकारस्य जश्त्वं न स्यात्। अस्माद्वचनाद्भवति। समानग्धिः। समानस्य सभावः। बब्धामिति।
भसेर्लोट् द्विवचने तस्तामित्यत्र पूर्वं श्लुः। द्विर्वचनमभ्यासकार्यं। घसिभसोर्हलि चेत्युपधालोपः। झलो झलीति स
कारलोपः। झषस्तथोर्धोऽध इति धत्वं। उपधालोपस्य स्थानिवत्वात् झलां जश् झशीति भकारस्य जश्त्वं न स्या
त्। अस्माद्वचनाद्भवति। चर्त्वम्। चर्त्वविधिं प्रति न स्थानिवत्। जक्षतुः। जक्षुः। अक्षन्नमीमदंत पितरः। लिटि द्विवचन
बहुवचनयोः अदो घस्लादेशः। गमहनजनखनघसां लोप इत्युपधालोपः। द्विर्वचनमभ्यासकार्य्यं। तत्रोपधा
लोपस्य स्थानिवत्वात् खरि चेति घकारस्य चर्त्वं न स्यात्। अस्माद्वचनाद्भवति। शासिवसिघसीनां चेति षत्वेन ष

१३

काशि०
१

धीयते। घ्राध्मोर्यङि चेति ईकारादेशस्तस्य स्थानिवद्भावाद् आकारस्य द्विर्वचनं स्यात् पूर्वग्रहणान्न भवति॥५८
॥ ॥अदर्शनं लोपः॥ ॥अदर्शनमश्रवणमनुच्चारणमनुपलब्धिरभावो विनाश इत्यनर्थान्तरं। एतैः शब्दैर्योऽर्थो
ऽभिधीयते तस्य लोप इत्येषा संज्ञा। अर्थस्येयं संज्ञा न शब्दस्य। प्रसक्तस्यादर्शनं लोपसंज्ञं भवति। गोधाया ढ्रक्।
गौधेरः। पचेरन्। जीवेरदानुक्। जीरदानुः। स्रिवेः। आस्रेमाणं। यकारवकारयोः प्रसक्तयोः अदर्शनमिहोदाह
रणम्। अपरस्य वानुबंधादेः प्रसक्तस्य। लोपप्रदेशा लोपो व्योर्वलीत्येवमादयः॥६०॥ ॥प्रत्ययस्य लुक्श्लुलु
पः॥ अदर्शनमिति वर्त्तते। प्रत्ययादर्शनस्य लुक् श्लु लुप् इत्येताः संज्ञा भवंति। अनेकसंज्ञाविधानाच्च तद्भावित
ग्रहणमिह विज्ञायते। लुक्संज्ञया भावितं प्रत्ययादर्शनं लुक्संज्ञं भवति। श्लुसंज्ञया भावितं श्लुसंज्ञं भवति।
लुप्संज्ञया भावितं लुप्संज्ञं भवति। तेन संज्ञानां संकरो न भविष्यति। विधिप्रदेशेषु च भाविनी संज्ञा विज्ञायते।
अत्ति। जुहोति। वरणाः। प्रत्ययग्रहणं किं। अगस्त्यः। कुंडिनाः। लुक्श्लुलुप्प्रदेशाः। लुक् तद्धितलुकि। जुहोत्या
दिभ्यः श्लुः। जनपदे लुबित्येवमादयः॥ ॥६१॥ ॥प्रत्ययलोपे प्रत्ययलक्षणम्॥ ॥प्रत्ययनिमित्तं कार्य्यमस
त्यपि प्रत्यये कथं नु नाम स्यादिति सूत्रमारभ्यते। प्रत्ययलोपे कृते प्रत्ययलक्षणं प्रत्ययहेतुकं कार्य्यं भवति। अ
ग्निचित्। अधोगिति। सुप्तिङोर्लुप्तयोः सुप्तिङंतं पदमिति पदसंज्ञा भवति। अधोगिति। दुहेर्लङ् तिपि श
ब्लुकि तिलोपे घत्वभष्भावजश्त्वचर्त्वेषु कृतेषु रूपं। प्रत्ययग्रहणेऽनुवर्तमाने पुनः प्रत्ययग्रहणं किं। कृत्स्नप्रत्य

१४

१४

यलोपे यथा स्यादिह मा भूत्। आघ्नीति। संघ्नीति। हनिगम्योर्लिङ्यात्मनेपदे लिङ्सलोपोऽनन्त्यस्येति सीयुटः।
सकारलोपः। प्रत्ययैकदेशलोपस्तत्प्रत्ययलक्षणम्। अनुदात्तोपदेशेऽनुनासिकलोपो न भवति। प्र
त्ययलक्षणमिति किं। रायः कुलं रैकुलं। गवे हितं गोहितं। आय्वादेशो न भवतः। वर्णाश्रयत्वात्॥ ६२॥ ॥
न लुमताङ्गस्य॥ पूर्वेणातिप्रसक्तं प्रत्ययलक्षणमिति विशेषप्रतिषेध उच्यते। लुमता शब्देन लुप्ते प्रत्यये
यदङ्गं तस्य प्रत्ययलक्षणं कार्यं न भवति। गर्गाः। मृष्टः। जुहुतः। शाद्यन्तयोर्लुमता लुप्तयोरङ्गस्य गुणवृद्धी न भव
तः। लुमतेति किं। कार्यते। हार्यते। अङ्गस्येति किं। पञ्च। सप्त। पय। साम॥ ६३॥ ॥ अचोऽन्त्यादि टि॥ ॥ अच इति नि
र्धारणे षष्ठी। जाताव्येकवचनं। अचां संनिविष्टानां योऽन्त्योऽच् तदादि शब्दरूपं टिसंज्ञं भवति। अग्निचित्। इत्यत्र
इः। सोमसुत्। उत्। शाब्। आतां। आथाम्। आम्। शाट्। पचेते। पचेथे। टिप्रदेशाः। टित आत्मनेपदानां टेरे इत्ये
वमादयः॥ ६४॥ ॥ अलोऽन्त्यात्पूर्व उपधा॥ ॥ धात्वादौ वर्णसमुदाये त्यादलः पूर्वोऽलेव उपधासंज्ञो भवति। पच्।
पठ्। अकारः। भिद्। छिद्। इकारः। बुध्। युध्। उकारः। वृत्। वृध्। ऋकारः। अल इति किं। शिष्। शिष्टः। शिष्टवान्। स
मुदायात्पूर्वस्य मा भूत्। उपधाप्रदेशाः। अत उपधाया इत्येवमादयः॥ ६५॥ ॥ तस्मिन्निति निर्दिष्टे पूर्वस्य॥ ॥
तस्मिन्निति सप्तम्यर्थनिर्देशे पूर्वस्यैव कार्यं भवति नोत्तरस्य। इको यणचि। दध्युदकं। मध्विदं। पचत्योदनं। निर्दि
ष्टग्रहणमानन्तर्यार्थं। अग्निचिदत्रेति व्यवहितस्य मा भूत्॥ ६६॥ ॥ तस्मादित्युत्तरस्य॥ ॥ निर्दिष्टग्रहणम
र्थं

मत्स्याद्यर्थं ङित्निर्देशः कर्तव्यः। ततो वक्तव्यं। तस्य ग्रहणं तद्विशेषाणां चेति। किं प्रयोजनं मत्स्याद्यर्थं। पक्षिमत्स्यमृ
गान्हन्ति। ठक्। मात्स्यिकः। तद्विशेषाणां च। शाकुनिकः। पर्यायाणां न भवति। अजिह्मान्हन्ति। अनिमिषान्हन्ति। अस्यैक
स्य पर्यायस्येष्यते। मीनान्हन्ति मैनिकः॥ ६८॥ ॥ अणुदित्सवर्णस्य चाप्रत्ययः॥ ॥ परेण णकारेण प्रत्याहारग्रहणम्।
अणगृ=वचन=ह्यमाण उदिच्च सवर्णानां ग्राहको भवति। स्वस्य च रूपस्य। प्रत्ययं वर्जयित्वा। आद्गुणः। अस्य च्वौ। यस्ये
ति च। स्वरानुनासिककालभिन्नस्यापि ग्रहणं भवति। उदित् खल्वपि। चुटू। लशक्वतद्धिते। चवर्गटवर्गयोः कव
र्गयोः कवर्गस्य च ग्रहणं भवति। अप्रत्यय इति किं। चिकीर्षुः। सनाशंसभिक्ष उः। असांप्रतिके। मध्यंदारुदीर्घो न
भवति॥ ६९॥ ॥ तपरस्तत्कालस्य॥ ॥ तः परो यस्मात् सोऽयं तपरः। तादपि परः तपरः। तपरो वर्णस्तत्कालस्यात्म
नातुल्यकालस्य गुणान्तरयुक्तस्य सवर्णस्य ग्राहको भवति स्वरूपस्य च। विध्यर्थमिदं। अणिति नानुवर्तते। अ
णामन्येषां च तपराणामिदमेव ग्रहणकशास्त्रं। अतो भिस ऐसित्येवमादिषु। पूर्वग्रहणकशास्त्रेण प्रवृत्तमेव।
अतपरा अणस्तस्यावकाशा इति। किमुदाहरणं। अतो भिस ऐस्। वृक्षैः। प्लक्षैः। विड्वनोरनुनासिकस्यात्। अब्जाः
गोजाः। तत्कालस्येति किं। खट्वाभिः। मालाभिः॥ ७०॥ ॥ आदिरन्त्येन सहेता॥ ॥ आदिरन्त्येनेत्संज्ञकेन सह
गृह्यमाणस्तन्मध्यवर्तिनां वर्णानां ग्राहको भवति। स्वस्य च रूपस्य। अण्। अक्। अच्। हल्। सुप्। तिङ्। अन्त्येने
ति किं। सुडिति टा इति तृतीयैकवचनेन ग्रहणं मा भूत्॥ ७१॥ ॥ येन विधिस्तदन्तस्य॥ ॥ येन विशेषणेन विधिर्वि

नुवर्त्तते। तस्मादिति पंचम्यर्थनिर्दिष्टे उत्तरस्यैव कार्य्यं भवति। नेह पूर्वस्य। तिङ्ङतिङः। ओदनं पचति। इह न भव
ति॥६७॥ ॥स्वं रूपं शब्दस्याशब्दसंज्ञा॥ ॥इह शास्त्रे स्वमेव रूपं शब्दस्य ग्राह्यं बोध्यं प्रत्याय्यं भवति। न
बाह्योऽर्थः। शब्दसंज्ञां वर्जयित्वा। शब्देनार्थावगतेः। अर्थे कार्य्यस्यासंभवात्। तद्वाचिनां शब्दानां संप्रत्ययो मा
भूद् इति सूत्रमारभ्यते। अग्नेर्ढक्। आग्नेयमष्टाकपालं निर्वपेत्। अग्निशब्दोऽग्निशब्दस्यैव ग्राहको भवति। ज्व
लनः पावको धूमकेतुरिति नातो भवति प्रत्ययः। उदश्वितोऽन्यतरस्याम्। औदश्वित्कं। औदश्वितं। तक्रमरिष्टं
कालशेयं दंडाहतं मथितमिति नातो भवति प्रत्ययः। अशब्दसंज्ञेति किम्। दाधाघ्वदाप्। तरप्तमपौ घः। घुग्रह
णेषु घग्रहणेषु च संज्ञिनो ग्रहणं न संज्ञायाः॥ सित्तद्विशेषाणां वृक्षाद्यर्थं सिन्निर्द्देशः कर्त्तव्यः। ततो वक्तव्यं
तद्विशेषाणां ग्रहणं भवतीति। किं प्रयोजनं। वृक्षाद्यर्थं। विभाषा वृक्षमृगतृणधान्य। प्लक्षन्यग्रोधं। प्लक्ष
न्यग्रोधौ॥ पित्पर्यायवचनस्य च स्वाद्यर्थं पिन्निर्द्देशः कर्त्तव्यः। ततो वक्तव्यं। पर्यायवचनस्य च ग्रहणं भवति।
स्वस्य च रूपस्य तद्विशेषाणां चेति। किं प्रयोजनं स्वाद्यर्थं। स्वे पुषः। स्वपोषं। रैपोषं। धनपोषं। अश्वपोषं। गो
पोषं। जित्पर्यायवचनस्यैव राजाद्यर्थं जिन्निर्द्देशः कर्त्तव्यः। ततो वक्तव्यं। पर्यायवचनस्यैव ग्रहणं भवति।
न स्वरूपस्य। नापि तद्विशेषाणां। किं प्रयोजनं। राजाद्यर्थं। सभा राजामनुष्यपूर्वा। इनसभं। ईश्वरसभं। तस्यैव
न भवति। राजसभा। तद्विशेषाणां च न भवति। पुष्यमित्रसभा। चंद्रगुप्तसभा। झित्तस्य च तद्विशेषाणां च

धीयते स तदंतस्याणोतस्य समुदायस्य ग्राहको भवति। स्वस्य च रूपस्य। एरच्। इवर्णांतादच् प्रत्ययः। चयः। ज
यः। अयः। ओरावश्यके। उवर्णांतादेण्यत् भवति। अवश्यलाव्यं। अवश्यपाव्यं। समासप्रत्ययविधौ प्रतिषेधः। समा
सविधौ प्रत्ययविधौ च तदंतस्य विधेः प्रतिषेधो वक्तव्यः। द्वितीया श्रितादिभिः सह समस्यते। कष्टश्रितः। इ
ह मा भूत्। कष्टं परमश्रितः। प्रत्ययविधौ। नडादिभ्यः फक्। नडस्यापत्यं नाडायनः। इह मा भूत्। सूत्रनडस्यापत्यं
सौत्रनाडिः। किमविशेषेण। नेत्याह। उगिद्वर्णग्रहणवर्जं। उगितश्च। ङीप् प्रत्ययस्तदंतादपि भवति। भव
ती। अतिभवती। वर्णग्रहणं। अत इञ्। दाक्षिः। प्लाक्षिः। यस्मिन्विधिस्तदादावल्ग्रहणे। अल्ग्रहणेषु यस्मिन्
विधिस्तदादाविति वक्तव्यं। अचि श्नुधातुभ्रुवां य्वोरियङुवङौ। श्रियः। भ्रुवः॥७२॥ ॥वृद्धिर्यस्याचामादिस्त
द्वृद्धम्॥ ॥यस्येति समुदाय उच्यते। अचां मध्ये यस्य वृद्धिसंज्ञक आदिभूतस्तच्छब्दरूपं वृद्धसंज्ञं भवति। अचा
मिति जातौ बहुवचनं। शालीयः। मालीयः। कापटवीयः। आदिरिति किं। सभासन्नयने भवः साभासन्नयनः। वाना
मधेयस्य वृद्धसंज्ञा वक्तव्या। देवदत्तीयाः। दैवदत्ताः। गोत्रान्तादसमस्तवत्प्रत्ययो भवतीति वक्तव्यम्। घृतप्रधानो रौ
ढिः। घृतरौढिः। तस्य छात्रा घृतरौढीयाः। ओदनप्रधानः पाणिनिः ओदनपाणिनिः। तस्य छात्रा ओदनपाणिनी
याः। वृद्धाम्भीयाः। वृद्धकाश्यपीयाः। जिह्वाकात्यहरितकात्यवर्जं। जैह्वाकाताः। हारितकाताः॥७३॥ ॥त्यदा
दीनि च॥ ॥यस्याचामादिग्रहणमुत्तरार्थमनुवर्तते। इह न संबध्यते। त्यदादीनि शब्दरूपाणि वृद्धसंज्ञानि भ

वंति। त्वदीयं। मदीयं। अदीयं। अदसीयद्वीपं। त्वादायनिः। मादायनिः। भवदीयं किमीयं॥७४॥ ॥एङ् प्राचां देशे॥ ॥
॥ यस्याचामादिस्तद्वृद्धमनुवर्तते एङ् यस्याचामादिस्तत्प्राचां देशाभिधाने वृद्धसंज्ञं भवति। एणीपचनीयः। गोनर्
दीयः। भोजकटीयः। गोनगरीयः। एङिति किं। आहिच्छत्रः। कान्यकुब्जः। प्राचामिति किं। देवदत्तो नाम वाहीकेषु ग्रा
मः। तत्र भवो दैवदत्तः। देश इति किं। गोमत्यां भवा मत्स्या गौमताः। प्राग्देशे विभजते हंसः क्षीरोदकं यथा। विदु
षां शब्दसिद्ध्यर्थं सा नः पातु सरस्वती॥७५॥ ॥इति काशिकायां वृत्तौ प्रथमाध्यायस्य प्रथमः पादः समाप्तः॥ ॥गा
ङ्कुटादिभ्योऽञ्णिन्ङित्॥ ॥अतिदेशोऽयं। गाङिति इङादेशो गृह्यते न गाङ् गतौ। ङकारस्यानन्यार्थत्वात्।
कुटादयः। कुट कौटिल्ये इत आरभ्य यावत् कुङ् शब्दे इति एतेभ्यो गाङ्कुटादिभ्यः परेऽञ्णितः प्रत्यया ङितो
भवंति। ङिद्वद्भवंतीत्यर्थः। गाङ्। अध्यगीष्ट। अध्यगीषातां। अध्यगीषत। कुटादिभ्यः। उत्कुटिता। उत्कुटितुं।
उत्कुटितव्यं। उत्पुटिता। उत्पुटितुं। उत्पुटितव्यं। अञ्णिदिति किं। उत्कोटयति। उदकोटि। उत्कोटकः। उत्कोटो व
र्तते। व्यचेः कुटादित्वमनसीति वक्तव्यं। विचिता। विचितुं। विचितव्यं। अनसीति किं। उरुव्यचाः॥१॥ ॥विज इट्॥ ॥ओ
विजी भयचलनयोः। अस्मात् परः इडादिप्रत्ययो ङिद्भवति। उद्विजिता। उद्विजितुं। उद्विजितव्यं। इडिति किं। उद्वेजनं।
उद्वेजनीयम्॥२॥ ॥विभाषोर्णोः॥ ॥इडिति वर्तते। ऊर्णुञ् आच्छादने। अस्मात् परः इडादिप्रत्ययो विभाषा ङि
द्भवति। प्रोर्णुविता। प्रोर्णविता। इत्येव। प्रोर्णवनं॥३॥ ॥सार्वधातुकमपित्॥ ॥सार्वधातुकं यदपित् त

कीर्षति। तुष्टूषति। चिकीर्षति। जिहीर्षति। इक इति किं। पिपासति। तिष्ठासति। झलिति किं। शिशयिषते। किम
र्थमिदमुच्यते। गुणो माभूदिति। अज्झनगमां सनीति दीर्घत्वं गुणस्य बाधकं भविष्यति। यद्येवं तर्हि गुणं बाधते
एवं णिलोपमपि बाधेत। तस्माद्दीर्घत्वस्यावकाशप्रदानाय कित्त्वमारभ्यते। चिकीर्षतीत्यादिषु सावकाशं दीर्घ
त्वं पश्चात् णिलोपेन बाध्यते। ज्ञीप्सति। इकः कित्त्वं गुणो माभूत्। दीर्घारंभात् कृते भवेत्। अनर्थकं तु ह्रस्वार्थं दी
र्घाणां तु प्रसज्यते। सामर्थ्याद्धि पुनर्भाव्यमृदित्वं दीर्घसंश्रयं। दीर्घाणां नाकृते दीर्घे णिलोपस्तु प्रयोजनं॥९॥
॥ ॥हलन्ताच्च॥ ॥इकः सन् झल् किदिति वर्तते। समीपवचनोऽन्तशब्दः। हलन्तात् सावर्ण्यग्रहणतः। इगन्तादिके
समीपगता हलः परः सन् झलादिः किद्भवति। बिभित्सति। बुभुत्सते। इक इत्येवापि यक्षते। झलित्येव। विवर्द्धि
षते। दंभेर्हल्ग्रहणस्य जातिवाचकत्वात् सिद्धं। धिप्सति। धीप्सति॥१०॥ ॥लिङ्सिचावात्मनेपदेषु॥ ॥ह
लंतादिको झल् किदिति वर्तते। सनिति निवृत्तं। इक्समीपाद्धलः परौ झलादी लिङ्सिचावात्मनेपदेषु परतः
कितौ भवतः। भित्सीष्ट। भुत्सीष्ट। सिचः खल्वपि। अभित्त। अबुद्ध। इक इत्येव। यक्षीष्ट। अयष्ट। कित्त्वे संप्रसार
णं हि स्यात्। आत्मनेपदेष्विति किं। अस्राक्षीत्। अद्राक्षीत्। सृजिदृशोर्झल्यमकिति इति अम्। गमो न स्यात्। हल
न्तादित्येव। चेषीष्ट। अचेष्ट। गुणो न स्यात्। झलित्येव। वर्तिषीष्ट। अवर्तिष्ट। गुणो न स्यात्। लिङ्सिचाविति किं।
द्वेष्टा। द्वेक्ष्यते॥११॥ ॥उश्च॥ ॥ऋवर्णान्ताद्धातोः परौ लिङ्सिचावात्मनेपदेषु झलादी कितौ भवतः। कृषी

१७

न्निन्द्भवति। कुरुतः। कुर्वंति। चिनुतः। चिन्वंति। सार्वधातुकमिति किम्। कर्त्ता। हर्त्ता। अपिदिति किं। करोति। करोषि। करोमि। ४। ॥ असंयोगाल्लिट् कित्॥ ॥ अपिदित्यनुवर्त्तते। असंयोगांताद्धातोः परो लिट् प्रत्ययो पित् किद्भवति। बिभिदतुः। बिभिदुः। ईजतुः। ईजुः। असंयोगादिति किं। सस्रंसे। दध्वंसे। अपिदित्येव। बिभेद। ५। ॥ इंधिभवतिभ्यां च॥ इंधिभवतिइत्येताभ्यां च परो लिट् प्रत्ययः किद्भवति। समीधे दस्यु हंतमं। पुत्रई धे अथर्वणः। भवतेः खल्वपि। बभूव। बभूविथ। इंधेः संयोगार्थं वचनं। भवतो पिदर्थं वचनं। अत्रेष्टिः। श्रंथिग्रंथिदंभिस्वंजीनामिति वक्तव्यम्। श्रेथतुः। श्रेथुः। ग्रेथतुः। देभतुः। देभुः। परिषस्वजाते। ६। ॥ मृडमृदगुधकुषक्लिशवदवसः क्त्वा॥ ॥ मृड। मृद। गुध। कुष। क्लिश। वद। वस इत्येतेभ्यः परः क्त्वा प्रत्ययः कित् किद्भवति। न क्त्वा सेट् इति प्रतिषेधं वक्ष्यति तस्यायं पुरस्तादपकर्षः। गुधकुषक्लिशानां तु रलो व्युपधाद्धलादेः संश्चेति विकल्पे प्राप्ते नित्यार्थं वचनं। मृडित्वा। मृदित्वा। गुधित्वा। कुषित्वा। क्लिशित्वा। उदित्वा। उषित्वा। ७। ॥ रुदविदमुषग्रहिस्वपिप्रच्छः संश्च॥ ॥ रुद। विद। मुष। ग्रहि। स्वपि। प्रच्छ। इत्येतेभ्यः परः संश्च क्त्वा च कितौ भवतः। रुदविदमुषाणां रलो व्युपधादिति विकल्पे प्राप्ते नित्यार्थं वचनं। ग्रहेर्विध्यर्थमेव। स्वपि — समर्थं ग्रहणं। किदेव हि क्त्वा। रुदित्वा। रुरुदिषति। विदित्वा। विविदिषति। मुषित्वा। मुमुषिषति। गृहीत्वा। जिघृक्षति। सुप्त्वा। सुषुप्सति। पृष्ट्वा। पिपृच्छिषति। ग्रहादीनां किच्चाप्य प्राप्त इति इड्विडागमः। ८। ॥ इको झल्॥ ॥ सन्नित्यनुवर्त्तते। क्त्वेति निवृत्तं। इगंताद्धातोः परो झलादिः सन् किद्भवति। चि

१७

काशि॰

१८

ष्ट। हृषीष्ट। सिचः खल्वपि। अकृत। अहृत। लिङिस्येवा। वरिषीष्ट। अवरिष्ट। आत्मनेपद इत्येव। अकार्षीत्। अहार्षीत्। १२। ॥ वा गमः॥ ॥ लिङ्सिचावात्मनेपदे इति वर्त्तते। गमेर्धातोः परो लिङ्सिचावात्मनेपदे झलादी कितौ वा भवतः। संगसीष्ट। संगंसीष्ट। सिचः खल्वपि। समगत। समगंस्त। कित्वपक्षे नुनासिकलोपो भवति। अनुदात्तोपदेशवनतितनोत्यादीनामिति। १३। ॥ हनः सिच्॥ ॥ हंतेर्धातोः परः सिच्प्रत्ययः किद्भवति। आहत। आहसातां। आहसत। सिचः कित्वादनुनासिकलोपः। सिज्ग्रहणं लिङ्निवृत्त्यर्थं उत्तरत्रानुवृत्तिर्माभूत्। आत्मनेपदग्रहणमुत्तरार्थमनुवर्त्तते। इह तु परस्मैपदे वृद्धिं ते बाधाभावस्य नित्यत्वात्किं तस्य प्रयोजनं नास्ति। १४। ॥ यमो गंधने॥ ॥ सिजात्मनेपदे इति वर्त्तते। यमेर्धातोर्गंधने वर्त्तमानात् परः सिच्प्रत्ययः किद्भवति आत्मनेपदे परतः। गंधनं सूचनं परेण प्रच्छाद्यमानस्यार्थस्याविष्करणं। अनेकार्थत्वाद्धातूनां यमिस्तत्र वर्त्तते। उदायत। उदायसातां। गंधनं इति किं। उदायंस्त। स्वचितवानित्यर्थः। सिचः कित्वादनुनासिकलोपः। आङो यमहन इत्यात्मनेपदं। गंधन इति किम्। उदायंस्त। पादं। उपायंस्त कूपाद्रज्जुम्। उद्धृतवानित्यर्थः। सकर्मकत्वेपि। समुदाङ्भ्यो यमो ग्रंथ इत्यात्मनेपदम्। १५। ॥ विभाषोपयमने॥ ॥ यमः सिजात्मनेपदे इति वर्त्तते। यमेर्धातोरुपयमने वर्त्तमानात् परः सिच्प्रत्ययो विभाषा किद्भवति आत्मनेपदे परतः। उपायत कन्यां। उपायंस्त कन्यां। उपायत भार्यां। उपायंस्त भार्यां। उपयमनं स्वीकरणं विवाहो दारकर्म्म पाणिग्रहणमित्यर्थः। उपा

१८

यमः स्वकरणे इत्यात्मनेपदम्॥१६॥ ॥स्थाघ्वोरिच्च॥ ॥सिजात्मनेपदेष्विति वर्त्तते। तिष्ठतेर्घुसंज्ञकानां चेकारः
अंतादेशः सिच्च किद्भवति आत्मनेपदेषु परतः। उपास्थित। उपास्थिषाताम्। उपास्थिषत। घुसंज्ञकानाम्। अदित। अधि
त। इत्वकस्य तकारे त्वं दीर्घमिच्छंति सः। अनंतरे प्लुतो माभूत् प्लुतस्तु विषये स्मृतः॥१७॥ ॥न क्त्वा सेट्॥ क्त्वाप्र
त्ययः सेट् न किद्भवति। देवित्वा। सेवित्वा। वर्त्तित्वा। वर्द्धित्वा। सेडिति किं। कृत्वा। हृत्वा। क्त्वाग्रहणं किं। निगृहीतिः। उ
पस्निहितिः। निकुचितिः। न सेडिति क्तेः कित्वे निष्ठायामवधारणात्। ज्ञापकाच्चान्यपरोक्षायां सतिकृत्। गृहगुपावि
ड इत्वं किल्लं नियोगेन रेण तुल्यं सुधीवनि। वस्त्वर्थं कीदृती देशा निगृहीतिः प्रयोजनं॥१८॥ ॥निष्ठा शीङ्स्विदि
मिदिक्ष्विदिधृषः॥ ॥न किदिति सेडित्यनुवर्त्तते। शीङ् स्विदि मिदि क्ष्विदि धृष इत्येतेभ्यः परो निष्ठाप्रत्ययः सेट् न कि
द्भवति। शयितः शयितवान्। प्रस्वेदितः। प्रस्वेदितवान्। प्रमेदितः। प्रमेदितवान्। प्रक्ष्वेदितः। प्रक्ष्वेदितवान्। प्रध
र्षितः। प्रधर्षितवान्। सेडित्येव। स्विन्नः। स्विन्नवान्। स्विदादीनामादितश्चेति निष्ठायामिट्प्रतिषिध्यते। विभाषाभा
वादिकर्मणोरिति पक्षे तु ज्ञायते। सविषयः कित्वप्रतिषेधस्य॥१९॥ ॥मृषस्तितिक्षायाम्॥ ॥मृषेर्धातोस्तितिक्षा
यामर्थे निष्ठा सेट् न किद्भवति। तितिक्षा क्षमा क्षांतिः। मर्षितः। मर्षितवान्। तितिक्षायामिति किं। अपमृषितं वा
क्यमाह॥२०॥ उदुपधाद्भावादिकर्मणोरन्यतरस्याम्॥ ॥निष्ठा सेट् न किदिति वर्त्तते। उदुपधाद्धातोः परो भा
वे आदिकर्मणि च वर्त्तमानो निष्ठाप्रत्ययः सेट् न किद्भवति। अन्यतरस्याम्। द्युतितमनेन। द्योतितमनेन। प्रद्युति

॥रलो व्युपधाद्धलादेः संश्च॥ ॥वेति वर्त्तते। सेडिति च॥ उश्च इश्च वी। ते उपधे यस्य व्युपधः। उकारोपधादिकारोप
धाद्धातो रलंताद्धलादेः परः संश्च क्त्वा च सेटौ कितौ भवतो वा। द्युतित्वा। द्योतित्वा। दिद्युतिषते। दिद्योतिष
ते। लिखित्वा। लेखित्वा। लिलिखिषति। लिलेखिषति। रल इति किं। देवित्वा। दिदेविषति। व्युपधादिति किं।
वर्त्तित्वा। विवर्त्तिषते। हलादेरिति। एषित्वा। एषिषिषति। सेडित्येव। भुक्त्वा। बुभुक्षते॥२६॥ ॥ऊकालोऽज्झ्रस्वदी
र्घप्लुतः॥ ॥उ इति त्रयाणां अयं एकमात्रिक द्विमात्रिक त्रिमात्रिकाणां प्रश्लेषनिर्देशः। ह्रस्वदीर्घप्लुत इति ईदृशे च
वेऽपुल्लिंगनिर्देशः। उ ऊ ऊ३ इत्येवं कालो यथाक्रमं ह्रस्वदीर्घप्लुत इत्येवं संज्ञो भवति। उकालो ह्रस्वः। दधि। म
धु। ऊकालो दीर्घः। कुमारी। गौरी। ऊ३कालो प्लुतः। देवदत्त३ अत्र न्वसि। कालग्रहणं परिमाणार्थं। दीर्घप्लुतयो
र्ह्रस्वसंज्ञा माभूत्। आलूय। प्रलूय। ह्रस्वस्य पिति कृति तुग्भवति। अज्ग्रहणं संयोगाच्समुदायनिवृत्त्यर्थं। प्रतक्ष्य।
प्ररक्ष्य। ह्रस्वाश्रयस्तुग्माभूत्। तितउच्छत्रं। दीर्घात्पदांताद्वेति विभाषा तुग्माभूदिति। ह्रस्वदीर्घप्लुतप्रदेशाः। ह्र
स्वो नपुंसके प्रातिपदिकस्य। अकृत्सार्वधातुकयोर्दीर्घः। वाक्यस्य टेः प्लुत उदात्त इत्येवमादयः॥२७॥ ॥अचश्च॥
॥ ॥परिभाषेयं स्थानिनियमार्था। ह्रस्वदीर्घप्लुताः स्वसंज्ञया विधीयमाना अच एव स्थाने वेदितव्याः। वक्ष्यति। ह्रस्वो न
पुंसके प्रातिपदिकस्य। अतिरि। अतिनु। उपगु। अच इति किम्। सुवाक्। ब्राह्मणकुलं। अकृत्सार्वधातुकयो
र्दीर्घः। चीयते। स्तूयते। अच इति किं। भिद्यते। छिद्यते। वाक्यस्य टेः प्लुत उदात्तः। देवदत्त३। अच इति किं। अग्निचि

॰ प्रद्योतितः। मुदितमनेन। मोदितमनेन। प्रमुदितः प्रमोदितः। उदुपधादिति किं। लिखितमनेन। स्विदितमनेन।
भावादिकर्मणोरिति किं। रुचितं कार्षापणं ददाति। सेडित्येव। भुक्तमनेन। प्रभुक्त ओदनः। व्यवस्थित विभाषात्वेयं।
तेन शब्विकरणानामेव भवति। गुध परिवेष्टने। गुधितमित्यत्र न भवति॥२१॥ ॥पूङः क्त्वा च। अन्यतरस्यामिति न स्व
र्यते। उत्तरसूत्रे पुनर्वावचनात्। न सेडिति वर्त्तते। पूङश्चेति इड्विहितः। क्लिशः क्त्वानिष्ठयोः पूङश्चेति। पूङः परो निष्ठाः
प्रत्ययः सेट् न किद्भवति। पवितः। पवितवान्। क्त्वाप्रत्ययस्य न क्त्वा सेडिति सिद्ध एव प्रतिषेधः। तस्य ग्रहणमुत्तरा
र्थं। तथा चोक्तं नित्यमकित्वमिडाद्योः क्त्वानिष्ठयोः क्त्वाग्रहणमुत्तरार्थमिति॥२२॥ नोपधात्थफान्ताद्वा॥ ॥निष्ठे
ति निवृत्तं। तकारोपधाद्धातोस्थकारान्तात् फकारान्ताच्च परः क्त्वाप्रत्ययः सेड्वा न किद्भवति। ग्रथित्वा। ग्रंथि
त्वा। ग्रथित्वा। ग्रंथित्वा। गुफित्वा। गुंफित्वा। नोपधादिति किं। रेफित्वा। गोफित्वा। थफान्तादिति किं। स्रंसित्वा।
ध्वंसित्वा॥२३॥ ॥वंचिलुंच्यृतश्च॥ ॥वंचिलुंचि ऋत इत्येतेभ्यः परः क्त्वाप्रत्ययः सेड्वा न किद्भवति। वचित्वा। वंचि
त्वा। लुचित्वा। लुंचित्वा। ऋतित्वा। अर्तित्वा। ऋतेरीयङ् आर्द्धधातुके विकल्पितः स यत्र पक्षे नास्ति तत्रेदमु
दाहरणम्। सेडित्येव। वक्त्वा॥२४॥ ॥तृषिमृषिकृशेः काश्यपस्य॥ ॥न क्त्वा सेडिति प्रतिषेधे प्राप्ते कित्वं
विकल्प्यते। तृषिमृषिकृशि इत्येतेभ्यः परः क्त्वाप्रत्ययः सेट् काश्यपस्याचार्यस्य मतेन वा न किद्भवति। तृ
षित्वा। तर्षित्वा। मृषित्वा। मर्षित्वा। कृशित्वा। कर्शित्वा। काश्यपग्रहणं पूजार्थं। वेत्येव हि वर्त्तते॥२५॥ ॥

॥ सोमसुत्। तकारस्य मा भूत्। संज्ञाया विधाने नियमः। अजिति हि वर्त्तते। इह मा भूत्। द्यौः। पंथाः। सः। चुभ्यां। घु
भिरिति नैतेषु यमो नास्ति॥२८॥ ॥उच्चैरुदात्तः॥ ॥अजिति वर्त्तते। उदात्तादिशब्दाः स्वरे वर्णधर्मे लोकवेदयोः प्रसि
द्धा एव। इह तु कुले अपि परिभाष्यन्ते। उच्चैरुपलभ्यमानोऽच् उदात्तसंज्ञो भवति। उच्चैरिति श्रुतिप्रकर्षो न गृह्यते। उ
च्चैर्भाषते। उच्चैः पठतीति। किं तर्हि स्थानकृतमुच्चत्वं संज्ञिनो विशेषणं। ताल्वादिषु हि भागवत्सु स्थानेषु वर्णा नि
ष्पद्यन्ते। तत्र यः समाने स्थाने ऊर्ध्वभागे निष्पन्नोऽच् स उदात्तसंज्ञो भवति। यस्मिन्नुच्चार्यमाणे आयामो गात्राणां
निग्रहो भवति रूक्षता च स्वरस्य संवृतता कंठविवरस्य चेति। ये के ते। उदात्तप्रदेशाः। आद्युदात्तश्चेत्येवमादयः॥२९॥
॥ ॥नीचैरनुदात्तः॥ ॥अजिति वर्त्तते। नीचैरुपलभ्यमानोऽच् अनुदात्तसंज्ञो भवति। समाने स्थाने नीचभाग
निष्पन्नो ह्यनुदात्तः। यस्मिन्नुच्चार्यमाणे गात्राणामन्ववसर्गो भवति। मार्दवं स्वरस्य मृदुता स्निग्धता। कंठविव
रस्योरुता। मरुता। त्व। सम। सिम। नेमेत्यनुदात्तानि। नमस्ते रुद्र नीलकंठ सहस्राक्ष। अनुदात्तप्रदेशाः। अनुदा
त्तौ सुप्पितावित्येवमादयः॥३०॥ ॥समाहारः स्वरितः॥ ॥अजिति वर्त्तते। उदात्तानुदात्तस्वरसमाहारोऽच् स्वरित
संज्ञो भवति। सामर्थ्याच्चात्र वेदलोकयोः प्रसिद्धो गुणावेव धर्मावुदात्तानुदात्तौ गृह्येते नाचौ। तौ समाह्रियेते य
स्मिन्नचि स तस्य स्वरितसंज्ञा विधीयते। शिक्यं कन्या। सामान्यः। क्व। स्वरितप्रदेशाः। तित्स्वरितमित्येवमादयः।
॥३१॥ ॥तस्यादित उदात्तमर्द्धह्रस्वम्॥ ॥उदात्तानुदात्तस्वरसमाहारः स्वरित इत्युक्तं तत्र न ज्ञायते। कस्मिन्

शेउदात्तः। कस्मिन्ननुदात्तः। क्रियान्वा उदात्तः। कियाननुदात्त इति तदुभयमाख्यायते। तस्य स्वरितस्य आदाव
र्द्धह्रस्वमुदात्तं। परिशिष्टमनुदात्तमिति। अर्द्धह्रस्वमिति वार्द्धमात्रोपलक्ष्यते। ह्रस्वग्रहणमतंत्रं। सर्वेषामेव ह्र
स्वदीर्घप्लुतानां स्वरितानामेष स्वरविभागः। शिक्यमित्यत्र अर्धमात्रा आदित उदात्ता। अर्द्धमात्रा अनुदात्ता। एकश्रुतिर्वा
।कन्येत्यत्र अर्द्धमात्रा आदित उदात्ता। अध्यर्धमात्रा चानुदात्ता। माणवक३ माणवक इत्यत्र अर्द्धमात्रा आदित उदा
त्ता। अर्द्धतृतीयमात्रा अनुदात्ता॥३२॥ ॥एकश्रुति दूरात्संबुद्धौ॥ ॥त्रैस्वर्ये पठितानां प्राप्ते दूरात्संबुद्धावेकवचनं श्रु
त्यविधीयते। एकाश्रुतिरस्य तदिदमेकश्रुति वाक्यं भवति। दूरात्संबोधयति। येन तत्संबोधनं संबुद्धिर्नैकवचनं। स्वराणामु
दात्तादीनामविभागो भेदतिरोधानमेकश्रुतिः। आगच्छ भो माणवक देवदत्त३। दूरादिति किं। आगच्छ भो माणवक देवद
त्त॥३३॥ ॥यज्ञकर्मण्यजपन्यूङ्खसामसु॥ ॥त्रैस्वर्येण वेदे मंत्राः पठ्यंते। तेषां यज्ञक्रियायामपि तथैव प्रयोगे प्राप्ते
एकश्रुतिर्विधीयते। यज्ञकर्मणि मंत्राणामेकश्रुत्यं भवति। जपन्यूङ्खसामानि वर्जयित्वा। अग्निर्मूर्द्धा दिवः ककुत्पतिः
पृथिव्या अयं। अपां रेतांसि जिन्वतो३म्। यज्ञकर्मणीति किं। संहितापाठे माभूत्। अजपेष्विति किम्। ममाग्ने वर्चो विहवे
ष्वस्तु। जपोनुकरणमंत्रः। उपांशुमंत्रप्रयोगः। अन्यूङ्खेष्विति किं। न्यूङ्खा। ओ ओ ओ ओ ओ ओ ओ ओ ओ ओ
ओ ओ ओ ओ ओ ओ। षोडश ओकाराः। तेषु केचिदुदात्ताः। केचिदनुदात्ताः। असामस्विति किं। एरृ विश्व१ समत्रि
णं दह। सामानि वाक्यविशेषस्था गीतय उच्यंते। तत्रैकश्रुतिर्न भवति॥३४॥ ॥उच्चैस्तरां वा वषट्कारः॥ ॥यज्ञकर्मणि

त्रितेपराङ्वस्परेइति। ततः सकलस्यामंत्रितस्याद्युदात्तत्वे कृते द्वितीयमक्षरमनुदात्तं तस्योदात्तादनुदात्तस्य स्वरित इ
ति स्वरितत्वे प्राप्ते इदमुदात्तत्वं विधीयते। तेन द्वावाद्यावुदात्तौ भवतः। शेषमनुदात्तं। हएाभ्यस्समेन इति। समानं पूर्वे
ण। गोरावस्कंदिन्निति। तथैवेद्व आद्ये अक्षरे उदात्ते शेषमनुदात्तं। अहल्यायै जारेति सुब्रं तस्यामंत्रितानुप्रवेशा
त इदेव स्वरः। द्वावुदात्तौ शेषमनुदात्तं। कौशिकब्राह्मणेति समस्तमामंत्रितं। आद्युदात्तं तत्र पूर्ववन्नीतिः। द्वावुदात्तौ शे
षमनुदात्तं। एवं गौतम ब्रुवाणेतित इदेव। श्वः सुत्यामागच्छ मघवन्निति श्वः उदात्तः सुत्यामित्यंतोदात्तः। संज्ञायां। स
मजनिपदेति क्यपो विधाने उदात्त इति वर्तते। आगच्छेति द्वावुदात्तौ। अंत्योनुदात्तः। मघवन्निति पदात्परमामंत्रितं नि
हन्यते॥३७॥ ॥देवब्रह्मणोरनुदात्तः॥ ॥सुब्रह्मण्यायामेव देवा ब्रह्माण इति पठ्यते। तत्र पूर्वेण स्वरितस्योदात्तः
प्राप्तः प्राप्तः। अनेनानुदात्तो विधीयते। देवब्रह्मणोः स्या=स्वरितस्यानुदात्तस्य स्थै आदेशो भवति। देवा ब्रह्माण आ
गच्छत। द्वयोरपि पदयोरामंत्रिताद्युदात्तत्वे कृते शेषनिघाते वोदात्तादनुदात्तस्य स्वरितः कृतः तस्यानुदात्तो भवति
॥३८॥ ॥स्वरितात्संहितायामनुदात्तानां॥ ॥एकश्रुतिरित्यनुवर्तते। स्वरितात्परेषामनुदात्तानामेकश्रुतिर्भव
ति संहितायां विषये। इमं मे गंगे यमुने सरस्वति शुतुद्रि माणवक जटिलकाध्यापक क्व गमिष्यसि। इममित्यंतोदात्तं।
मे इत्यनुदात्तं। विधिकाल एव निघातविधानात्। तस्य पुनरुदात्तादनुदात्तस्य स्वरित इति संपद्यते। तस्मात्स्वरि
तात्परेषामनुदात्तानां गंगे प्रभृतीनां एकश्रुतिर्भवति। सर्व एते आमंत्रितनिघाते नानुदात्ताः। माणवक जटिलका

क्ति वर्त्तते। यज्ञकर्म्मणि वषट्कार उच्चैस्तरां भवति एकश्रुतिर्वा। वषट्शब्देन चात्र वौषट्शब्दो लक्ष्यते। तस्येदं स्वरविधा
नं। यद्येवं वौषड्ग्रहणमेव कस्मान्न कृतं वैचित्र्यार्थं। विचित्रा हि सूत्रस्य कृतिः पाणिनेः। सोमस्याग्ने वीही३ वौषट्। सो
मस्याग्ने वीही३ वौ३षट्॥३५॥ ॥विभाषा छन्दसि॥ ॥छंदसि विषये विभाषा एकश्रुतिर्भवति। पक्षे त्रैस्वर्य्यमेव। नेति
व प्रकृते विभाषाग्रहणं यज्ञकर्मणि सस्य निवृत्त्यर्थम्। तेनायं स्वाध्यायकाले पाक्षिक एकश्रुतिविधिर्भवति॥ इषे त्वो
र्ज्जे त्वा। इषे त्वोर्ज्जे त्वा। अग्न आयाहि वीतये। अग्न आयाहि वीतये। अग्निमीळे पुरोहितं। अग्निमीळे पुरोहितं। शन्नो
देवीरभिष्टये। शन्नो देवीरभिष्टये॥३६॥ ॥न सुब्रह्मण्यायां स्वरितस्य तूदात्तः॥ ॥सुब्रह्मण्या नाम निगदस्तत्र यज्ञ
कर्मणीति विभाषा छंदसीति चैकश्रुतिः प्राप्ता प्रतिषिध्यते। सुब्रह्मण्यायामेकश्रुतिर्न भवति। यस्तु लक्षणप्राप्तः
स्वरितस्तस्योदात्तादेशो भवति। सुब्रह्मण्यो३म्। इंद्रागच्छ हरिव आगच्छ मेधातिथेर्मेष वृषणश्वस्य मेने। गौरा
वस्कंदिन्नहल्यायै जार कौशिक ब्राह्मण गौतम ब्रुवाण श्वः सुत्यामागच्छ मघवन्नित्र सुब्रह्मण्योमिति। ओंकारस्ति
स्वरेणास्वरितः। तस्योदात्तो विधीयते। इंद्रागच्छेत्यामंत्रितमाद्युदात्तं द्वितीयो वर्णोऽनुदात्तः। उदात्तादनुदात्तस्य
स्वरित इति स्वरितः प्रसक्तः तस्यानेनोदात्तः क्रियते। द्वावप्युदात्तौ संपन्नौ। आगच्छ इत्याकार उदात्तस्ततः परोनु
दात्तः तस्य स्वरितस्तस्यानेनोदात्तः क्रियते। तदेवमिंद्र आगच्छेति चत्वार उदात्ताः। पश्चिम एकोनुदात्तः। हरिव आगच्छे
त्यनयैव प्रक्रियया चत्वार उदात्ताः द्वावनुदात्तौ। मेधातिथेर्मेष इति। षष्ठ्यंतं परमामंत्रितमनुप्रविशतीति। सुबाम

२१

२२

…पकेति प्रथमामंत्रितमाद्युदात्तं तस्य द्वितीयमक्षरं स्वरितं ततः परेषामनुदात्तानामेकश्रुतिर्भवति। संहिताग्रह
णं किं। अवग्रहे माभूत्। इमं मे गंगे यमुने सरस्वति॥३९॥ ॥उदात्तस्वरितपरस्य सन्नतरः॥ ॥अनुदात्तग्रहणम
नुवर्त्तते। उदात्तः परो यस्मादुदात्तपरः स्वरितः परो यस्मात्स्वरितपरः तं। उदात्तपरस्य स्वरितपरस्य वानुदात्तस्य
सन्नतर आदेशो भवति। अनुदात्ततर इत्यर्थः। देवा मरुतः पृश्निमातरोपः। मातर इत्यनुदात्तः अप इत्यंतोदात्तः।
ऊडिदंपदाद्यप्पुम्रैद्युभ्यः तत्रानुदात्तयोरेकादेशः। ओकारोनुदात्तः। तस्योदात्ते परभूते सन्नतर आदेशो भवति। इ
मम्मे गंगे यमुने सरस्वति शुतुद्रि। इकारोनुदात्तः। शुतुद्रि इत्येतदामंत्रितं। पादादौ तस्मान्न निहन्यते अनुदात्तं सर्वमा
पादादाविति। तस्य प्रथममक्षरमुदात्तं तस्मिन्परभूते इवर्णस्य सरस्वतीकारस्य सन्नतर आदेशो भवति। माणव
क जटिलकाध्यापक क्व गमिष्यसीति। क्व इति स्वरितः तस्मिन्परभूते क इत्यस्यानुदात्तस्य सन्नतर आदेशो भवति॥४०॥
॥॥अपृक्त एकाल्प्रत्ययः॥ ॥अपृक्त इतीयं संज्ञा भवति एकाल् यः प्रत्ययस्तस्य। असहायवाची एकशब्दः। स्पृशोनुदके
क्विन्। घृतस्पृक्। दलस्पृक्। भजो ण्विः। अर्द्धभाक्। पापभाक्। एकालिति किं। दर्विः। जागृविः। प्रत्यय इति किं। सुराः। अ
पृक्तप्रदेशाः। वेरपृक्तस्येत्येवमादयः॥४१॥ ॥तत्पुरुषः समानाधिकरणः कर्म्मधारयः॥ ॥तत्पुरुष इति समासविशे
षस्य संज्ञां वक्ष्यति। तत्पुरुषः समानाधिकरणपदः कर्मधारयसंज्ञो भवति। अधिकरणशब्दोभिधेयवाची। समाना
भिधेयः समानाधिकरणः। परमराज्यं। पाचकवृंदारिका। तत्पुरुष इति किं। पाचिकाभार्य्यः। समानाधिकरण

२२

इति किं। ब्राह्मणराज्यं। कर्मधारयपदे त्वाः। पुंवत्कर्मधारयजातीयदेशीयेष्वित्येवमादयः॥४२॥ ॥प्रथमानिर्दिष्टं
समास उपसर्जनम्॥ ॥प्रथमया विभक्त्या यन्निर्दिश्यते समासशास्त्रे तदुपसर्जनसंज्ञं भवति। समास इति
समासविधायकं शास्त्रं गृह्यते। वक्ष्यति। द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैरिति द्वितीयासमासे द्विती
येत्येतत्प्रथमानिर्दिष्टं तृतीयासमासे तृतीयेत्येतत्। चतुर्थीसमासे चतुर्थीति। पंचमीसमासे पंचमीति। षष्ठीस
मासे षष्ठीति। सप्तमीसमासे सप्तमीति। कष्टश्रितः। शंकुलाखण्डः। यूपदारु। वृकभयं। राजपुरुषः। अक्षशौण्डः।
उपसर्जनप्रदेशाः। उपसर्जनं पूर्वमित्येवमादयः॥४३॥ ॥एकविभक्ति चापूर्वनिपाते॥ ॥एकविभक्ति यस्य
तिष्ठं तदिह समे एकविभक्तिसमासे विधीयमाने यन्नियतविभक्तिकं द्वितीयसंबंधिनि बहुभिर्विभक्तिभिर्युज्यमा
नेऽपि यदेकयैव विभक्त्या युज्यते तदुपसर्जनसंज्ञं भवति। अपूर्वनिपाते। पूर्वनिपाताख्यमुपसर्जनकार्यं व
र्जयित्वा। निरादयः क्रान्ताद्यर्थे पंचम्या। पूर्वपदे नाना विभक्तिकेऽपि उत्तरपदं पंचम्यन्तमेव भवति। निष्क्रान्तः
कौशाम्ब्याः। कौशाम्बिः निः। क्रान्तकौशाम्ब्याः। निःकौशाम्बिम्। निःक्रान्तेन कौशाम्ब्याः। निःकौशाम्बिना। निष्क्रा
ताय कौशाम्ब्याः। निःकौशाम्बये। निष्क्रान्तात् कौशाम्ब्याः निःकौशाम्बेः निष्क्रान्तस्य कौशाम्ब्याः निःकौशाम्बेः
। निष्क्रान्ते कौशाम्ब्याः। निःकौशाम्बौ॥ निर्वाराणसिः। एकविभक्तीति किं। राजकुमारी। अपूर्वनिपात इति किम्।
हि भवति। कौशाम्बिर्निरिति॥ ॥४४॥ ॥अर्थवदधातुरप्रत्ययः प्रातिपदिकम्॥ ॥अभिधेयवचनोऽर्थ

जैन

स्वो भवति। चित्रगुः। शबलगुः। स्त्री। निष्कौशाम्बिः। निर्वाराणसिः। अतिखट्वः। अतिमालः। उपसर्जनस्येति किम्। राजकु
मारी। स्वरितत्वविज्ञानं किम्। अतितंत्रीः। अतिलक्ष्मीः। ईयसो बहुव्रीहौ प्रतिषेधो वक्तव्यः। बहुश्रेयसी। अविद्य
मानश्रेयसी॥४८॥ ॥लुक् तद्धितलुकि॥ ॥स्त्रीग्रहणमनुवर्त्तते। उपसर्जनस्येति च। पूर्वेण ह्रस्वे प्राप्ते लुग्विधी
यते। तद्धितलुकि स्त्रीप्रत्ययस्योपसर्जनस्य लुग्भवति। पंचेन्द्राण्यो देवता अस्य पंचेन्द्रः। दशेन्द्रः। पंचभिः शष्कुली
भिः क्रीतः पटः पंचशष्कुलः। दशशष्कुलः। आमलक्याः फलमामलकं। कुवलं। बदरं। तद्धितग्रहणं किं। गार्गीकुलं।
लुकीति किं। गार्गीत्वं। उपसर्जनस्येत्येव। अवंती। कुंती। कुरूः॥४९॥ ॥इद्गोण्याः॥ ॥पूर्वेण लुकि प्राप्ते इकारो
विधीयते गोण्यास्तद्धितलुकि सति इकारादेशो भवति। पंचभिर्गोणीभिः क्रीतः पटः पंचगोणिः। दशगोणिः
। इदिति योगविभागः कर्त्तव्यः। सूच्याद्यर्थः। पंचभिः सूचीभिः क्रीतः पटः पंचसूचिः दशसूचिः। सर्वेऽपि विष
य एव॥५०॥ ॥लुपि युक्तवद्व्यक्तिवचने॥ ॥लुपीति लुप्संज्ञया लुप्तस्य प्रत्ययस्यार्थ उच्यते। तत्र लुपि युक्तव
द्व्यक्तिवचने भवतः। युक्तवदिति निष्ठाप्रत्ययेन क्तवतुना प्रकृत्यर्थ उच्यते। स हि प्रत्ययार्थमात्मना युनक्ति। तस्य
युक्तवतो व्यक्तिवचने युक्तवद्व्यक्तिवचने लुबर्थे विधीयते। अथवा युक्तः प्रकृत्यर्थः प्रत्ययार्थेन संबद्धः तस्मिन्नि
व व्यक्तिवचने लुबर्थे विधीयेते। अथवा युक्तः प्रकृत्यर्थः प्रत्ययार्थेन संबद्धः तस्मिन्निव भवतः। सप्तम्यर्थे वतिः
। व्यक्तिवचन इति च लिंगसंख्ययोः पूर्वाचार्यनिर्देशस्तदीयमेवेदं सूत्रं। तथा चास्य प्रत्याख्यानं करिष्यति।

ण्वः। अर्थवद्धद्रूपं प्रातिपदिकसंज्ञं भवति। धातुं प्रत्ययं च वर्ज्जयित्वा। डित्थः। डपित्थः। कुंडं। पीठं। अर्थव
दिति किं। वनं धनं नां तस्यावधेर्मञ्ज्ञित्। न लोपो हि स्यात्। अधातुरिति किं। हंते र्लङि अहन्। नलोपः स्यात्।
अप्रत्यय इति किं। कांडे। कुड्ये। ह्रस्वो नपुंसके प्रातिपदिकस्येति ह्रस्वः स्यात्। प्रातिपदिकप्रदेशाः ह्रस्वो
नपुंसके प्रातिपदिकस्येत्येवमादयः॥४५॥ ॥कृत्तद्धितसमासाश्च॥ ॥कृत्तद्धितसमासाः प्रातिपदिकसं
ज्ञा भवंति। अप्रत्यय इति पूर्वसूत्रे पर्युदासात्। कृदंतस्य तद्धितांतस्य चानेन प्रातिपदिकसंज्ञा विधीय
ते। अर्थवत्समुदायानां समासग्रहणं नियमार्थं। कृत्। कारकः। कर्त्ता। तद्धितः। औपगवः। कापटवः। समासः।
राजपुरुषः। ब्राह्मणकंबलः। समासग्रहणस्य नियमार्थत्वात्। वाक्यस्यार्थवतः प्रातिपदिकसंज्ञा न भ
वति॥४६॥ ॥ह्रस्वो नपुंसके प्रातिपदिकस्य॥ ॥नपुंसकलिंगेर्थे यत्प्रातिपदिकं वर्त्तते तस्य ह्रस्वो भ
वत्यादेशः। अलोंत्यस्याचः। अतिरि कुलं। अतिनु जलं। नपुंसकेति किं। ग्रामणीः। सेनानीः। प्रातिपदि
कस्येति किं। कांडे तिष्ठतः। प्रातिपदिकग्रहणसामर्थ्यादेकादेशः पूर्वस्यांतवन्न भवति॥४७॥ ॥गोस्त्रि
योरुपसर्ज्जनस्य॥ ॥प्रातिपदिकस्येति वर्त्तते। गो इति स्वरूपग्रहणं। स्त्री इति प्रत्ययग्रहणं। स्वरितत्वादु
त्। उपसर्ज्जनग्रहणं तयोर्विशेषणं गोरुपसर्ज्जनस्य स्त्रीप्रत्ययांतस्य चोपसर्ज्जनस्येति ताभ्यां प्रातिप
दिकस्य तदंतविधिः उपसर्ज्जनगोशब्दस्य उपसर्ज्जनस्य स्त्रीप्रत्ययांतस्य प्रातिपदिकस्य ह्र

२२

तदशिष्यं संज्ञाप्रमाणत्वादिति। व्यक्तिः स्त्रीपुंनपुंसकानि। वचनमेकद्वित्वबहुत्वानि। पंचालाः क्षत्रियाः। पु
ल्लिंगा बहुवचनविषयास्तेषां निवासो जनपदः। यथा तेषु क्षत्रियेषु व्यक्तिवचने तद्वज्जनपदेप्यतः। पंचालाः। कुरवो
मगधाः। मत्स्याः। अंगाः। वंगाः। सुह्माः। पुंड्राः। लुपि किं। लुकि मा भूत्। लवणः सूपः। लवणं शाकं। लवणा यवागूः
। व्यक्तिवचने इति किं। शिरीषाणामदूरभवो ग्रामः शिरीषास्तस्य शिरीषवनं विभाषौषधिवनस्पतिभ्यः इति ण
त्वं न भवति। हरीतक्यादिषु व्यक्तिः। हरीतक्याः फलानि हरीतक्यः फलानि। हरीतक्यादिभ्यश्चेति लुप्। वचनमभिधेय
वत्। खलतिकादिषु वचनं। खलतिकस्य पर्वतस्यादूरभवानि वनानि खलतिकं वनानि॥५१॥ ॥विशेषणानां चाजा
तेः॥ ॥लुपीति वर्त्तते। लुबर्थस्य यानि विशेषणानि तेषामपि युक्तवद्व्यक्तिवचने भवतः। जातिं वर्ज्जयित्वा। पंचा
लाः रमणीयाः। बह्वन्नाः। बहुक्षीरघृताः। बहुमाल्यफलाः। गोदौ रमणीयौ। बह्वन्नौ। बहुक्षीरघृतौ। बहुमा
ल्यफलौ। अजातेरिति किं। पंचाला जनपदः। गोदौ ग्रामः। जात्यर्थस्य चायं युक्तवद्भावप्रतिषेधः। तेन जातिद्वा
रेण यानि विशेषणानि तेषामपि युक्तवद्भावो न भवति। पंचाला जनपदो रमणीयो बह्वन्नः। गोदौ ग्रामो रमणी
यो बह्वन्न इति। मनुष्यलुपि प्रतिषेधो वक्तव्यः। चंचाभिरूपः। वध्रिकादर्शनीयः। चर्मविकारविशेषो वध्रिका
॥५२॥ ॥तदशिष्यं संज्ञाप्रमाणत्वात्॥ ॥तदिति प्रकृतं युक्तवद्भावरूपं लक्षणं प्रतिनिर्दिश्यते। तदेतदशि
ष्यमवक्तव्यं। कुतः। संज्ञाप्रमाणत्वात्। संज्ञाशब्दानां हि नाना लिंगसंख्याः प्रमाणं। पंचाला वरणा इति वचनेनैयो

२५ वनं २४

गरशब्दाः। किं तर्हि जनपदादीनां संज्ञा एताः। तत्र लिंगवचनं स्वभावसिद्धमेव। न यत्नप्रतिपाद्यं। यथा आपो
दाराः सिकता वर्षा इत्यादि इति॥५३॥ ॥लुब्योगाप्रख्यानात्॥ ॥लुबप्यशिष्यो योयं जनपदे लुप्वरणादिभ्य
श्च तिलुप्युच्यते। अयमप्यशक्यः। किं कारणं योगाप्रख्यानात्। न हि पंचाला वरणा इति च योगः संबंधः प्रख्याय
ते। नेतदुपलभामहे इह क्षेत्रयोगात् नगरे वरणशब्द इति। किं तर्हि संज्ञा एता तस्मात् तत्तस्य निवासः अदूरभ
वश्चेति तद्धितो नेवोत्पद्यते। किं लुपो विधानेन॥५४॥ ॥योगप्रमाणे च तदभावेदर्शनं स्यात्॥ ॥पंचाला
दयः संज्ञाशब्दा न योगनिमित्ता इत्युक्तम्। तथा च इदमेवाभ्युपगंतव्यम्। योगप्रमाणे हि तदभावे दर्श
नं स्यात्। यदि पंचालादिशब्दो योगस्य प्रमाणं योगस्य वाचकः स्यात्। तत्र तदभावे योगाभावे तस्यादर्श
नमप्रयोगः स्यात्। दृश्यते च संप्रति विनष्टे क्षत्रियसंबंधे जनपदे पंचालशब्दः। ततोऽवसीयते नायं यो
गनिमित्तकः। किं तर्हि रूढिरूपेणैव तत्र प्रवृत्त इति॥५५॥ ॥प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वा
त्॥ ॥अशिष्यमिति वर्तते। प्रधानं समासे किंचित्पदं। प्रत्ययस्तु पदादिः। ताभ्यामर्थवचनमर्थाभिधान
मनेन प्रकारेण भवतीति पूर्वाचार्यैः परिभाषितं। प्रधानोपसर्जने प्रधानार्थं सह ब्रूतः। प्रकृतिप्रत्ययौ
प्रत्ययार्थं सह ब्रूत इति। तत्पाणिनिराचार्यः प्रत्याचष्टे। अशिष्यमेतत्। अर्थस्यान्यप्रमाणत्वात्। अन्य
इति शास्त्रापेक्षया लोको व्यपदिश्यते। शब्दैरर्थाभिधानं स्वाभाविकं न पारिभाषिकमशक्यत्वात्। लोके

षइदमुच्यते। जातेराख्या जात्याख्या तस्यां जात्याख्यायामेकस्मिन्नर्थे बहुवचनमन्यतरस्यां भवति। जात्यर्थो
वा बहुवद्भवति। तियावत् तिन तद्विशेषणानाम जातिशब्दो नाम यि संपन्नादीनां बहुवचनमुपपद्यते। संपन्नो
यवः। संपन्ना यवाः। संपन्नो व्रीहिः। संपन्ना व्रीहयः। पूर्ववया ब्राह्मणः प्रत्युत्थेयः। पूर्ववयसो ब्राह्मणाः प्रत्युत्थेयाः
। जातिग्रहणं किं। देवदत्तो यज्ञदत्तः। आख्याग्रहणं किम्। काश्यपप्रतिकृतिः काश्यपो भवत्ययं जातिशब्दत्वेन न
जातिराख्यायते। किं तर्हि प्रतिकृतिः। एकस्मिन्निति किं। व्रीहियवौ। संख्याप्रयोगे प्रतिषेधो वक्तव्यः। एको व्रीहिः
संपन्नः सुभिक्षं करोति॥५८॥ ॥अस्मदो द्वयोश्च॥ ॥अस्मद एकत्वे द्वित्वे च बहुवचनमन्यतरस्यां भवति। अहं
ब्रवीति। वयं ब्रूमः। आवां ब्रूवः। वयं ब्रूमः। सविशेषणस्य प्रतिषेधो वक्तव्यः। अहं देवदत्तो ब्रवीमि। अहं गार्ग्यो ब्रवी
मि। अहं पटुर्ब्रवीति। अहं पंडितो ब्रवीति। युष्मदि गुरावेकेषां। त्वं मे गुरुः। यूयं मे गुरवः॥५९॥ ॥फल्गुनीप्रोष्ठप
दानां च नक्षत्रे॥ ॥चकारो द्वयोरित्यनुकर्षणार्थः। फल्गुन्योर्द्वयोः प्रोष्ठपदयोश्च नक्षत्रयोर्बहुवचनमन्यत
रस्यां भवति। कदा पूर्वाः फल्गुन्यः। कदा पूर्वे फल्गुन्यौ। कदा पूर्वे प्रोष्ठपदे। कदा पूर्वाः प्रोष्ठपदाः। नक्षत्र इति
किम्। फल्गुन्यौ माणविके॥६०॥ ॥छंदसि पुनर्वस्वोरेकवचनं॥ ॥अन्यतरस्यामिति वर्तते। द्वयोर्द्विवचने
प्राप्ते पुनर्वस्वोश्छंदसि विषये एकवचनमन्यतरस्यां भवति। पुनर्वसुर्नक्षत्रमदितिर्देवता। पुनर्वसू नक्षत्र
मदितिर्देवता। छंदसि किं। पुनर्वसू नक्षत्र इत्येव। पुनर्वसू माणवकौ॥६१॥ ॥विशाखयोश्च॥ ॥छंदसि

२५

तत्त्वार्थविगतिः। येरपि व्याकरणं न श्रुतं ते ऽपि राजपुरुषमानयेत्युक्ते राजविशिष्टं पुरुषमानयंति न राजानं ना
पि पुरुषमात्रं। औपगवमानयेत्युक्ते उपगुविशिष्टमपत्यमानयंति नोपगुं नाप्यपत्यमात्रं। यश्च लोकतोर्थः
सिद्धः तत्र किं यत्नेन॥५६॥ ॥कालोपसर्जने च तुल्यम्॥ ॥अशिष्यमिति वर्तते। कालोपसर्जने च अशिष्ये।
कस्मादर्थस्यान्यप्रमाणत्वात्। तुल्यग्रहणं हेतुत्वेनुकर्षणार्थः। अशिष्यविशेषणं चेतत्। कालोपसर्जने च
तुल्यमशिष्ये। इहाप्येके वैयाकरणाः कालोपसर्जनयोः परिभाषां कुर्वंति। आन्याय्यात्। उत्थानादान्याय्याच्च सं
वेशनादेषो ऽद्यतनः कालः। अपरे तु पुनराहुः अहरुभयतो ऽर्द्धरात्रमेषो ऽद्यतनः काल इति। तथा उपसर्ज
नपरिभाषां कुर्वंति। अप्रधानमुपसर्जनमिति। तस्याशिष्यत्वं तदाचार्यः प्रत्याचष्टे। लोकतोर्थावगते। येरपि व्या
करणं न श्रुतं ते ऽप्याहुः। इदमस्माभिरद्य कर्तव्यमिदं श्वः कर्तव्यमिदं ह्यः कृतमिति। न च पुनः साध्यंते। तथोपसर्जन
वयमत्र गृहे ग्रामे उपसर्जनम्प्रमाणमिति गम्यते। यश्च लोकतोर्थः सिद्धः तत्र किं यत्नेन। यद्येवं पूर्वसूत्र एव
कालोपसर्जनग्रहणं कस्मान्न क्रियते। किमर्थो योगविभागः। प्रदर्शनार्थः। अन्यदप्येवंजातीयकमशिष्यमि
ति। तथा हि पूर्वाचार्यैः परिभाषते। मत्वर्थे बहुव्रीहिः। पूर्वपदार्थप्रधानो ऽव्ययीभावः। उत्तरपदार्थप्रधान
स्तत्पुरुषः। उभयपदार्थप्रधानो द्वंद्वः। इत्येवमादि तया तदप्यशिष्यमिति॥५७॥ ॥जात्याख्यायामेकस्मि
न्बहुवचनमन्यतरस्याम्॥ ॥अशिष्यमिति निवृत्तं। जातिर्नाम प्रयमेकोर्थस्तदभिधाने एकवचनमेव प्रा

२५

२६

त्तिवर्तते। द्विवचने प्राप्ते छंदसि विषये विशाखयोरेकवचनमन्यतरस्यां भवति। विशाखानक्षत्रमिंद्राग्नी देवता।
विशाखे नक्षत्रे इंद्राग्नी देवता॥६२॥ ॥तिष्यपुनर्वस्वोर्नक्षत्रद्वंद्वे बहुवचनस्य द्विवचनं नित्यम्॥ ॥छंदसी
ति निवृत्तम्। तिष्य एकः पुनर्वसू द्वौ। तेषां द्वंद्वो बह्वर्थः तत्र बहुवचने प्राप्ते द्विवचनं विधीयते। तिष्यपुनर्वस्वो
र्नक्षत्रविषये द्वंद्वे बहुवचनस्य प्रसंगे नित्यं द्विवचनं भवति। उदितौ तिष्यपुनर्वसू दृश्येते। तिष्यपुनर्वस्वो
रिति किं। राधानुराधाः नक्षत्र इति किं। तिष्यश्च माणवकः। पुनर्वसू च माणवकौ तिष्यपुनर्वसवो माणवकाः।
ननु च प्रकृतमेव नक्षत्रग्रहणं किमर्थं पुनरुच्यते। पर्यायाणामपि यथा स्यात्। सिध्यपुनर्वसू। पुष्यपुन
र्वसू इति। द्वंद्व इति किं। यस्तिष्यस्तौ पुनर्वसू एषां त इमे तिष्यपुनर्वसवः। उन्मुग्धाः। तिष्यादय एव विपर्या
सेन दृश्यमाणा बहुव्रीहिणा उच्यंते। अनेन नक्षत्रसमासस्याये। बहुवचनस्येति किं। एकवचनस्य माभू
त्। तिष्यपुनर्वसु इदमिति सर्वो द्वंद्वो विभाषयैकवद्भवतीति। अस्यैतदेव ज्ञापकम्। नित्यग्रहणं वि
कल्पनिवृत्त्यर्थम्॥६३॥ ॥सरूपाणामेकशेष एकविभक्तौ॥ ॥समानं रूपं येषां ते सरूपाः। सरूपा
णां शब्दानामेकविभक्तौ परत एकशेषो भवति एकः शिष्यते इतरे निवर्तंते। वृक्षश्च वृक्षश्च वृक्षौ। वृ
क्षश्च वृक्षश्च वृक्षश्च वृक्षाः। प्रत्यर्थं शब्दनिवेशान्नैकेनानेकस्यार्थस्याभिधानं तत्रानेकार्थस्याभि
धाने ऽनेकशब्दत्वं प्राप्तं तस्मादेकशेषः। सरूपाणामिति किं। वृक्षप्लक्षौ। रूपग्रहणं किं। भिन्ने

२६

र्थं यथा स्यात्। अक्षाः पादा माषा इति। एकग्रहणं किं। द्विबह्वोः शेषो मा भूत्। शेषग्रहणं किं। आदेशो मा भूत्।
एकविभक्ताविति किं। पयः पयो जायते इति। ब्राह्मणाभ्यां च कृतं ब्राह्मणाभ्यां देहि॥ ६४॥ ॥ वृद्धो यूना तल्ल-
क्षणश्चेदेव विशेषः॥ ॥ शेष इति किं। यूनेति सहयोगे तृतीया। यूना सह वचने वृद्धः शिष्यते युवा निवर्त्त-
ते। वृद्धशब्दः पूर्वाचार्यसंज्ञा गोत्रस्यापत्यमन्तर्हितं वृद्धमिति। वृद्धो यूना सह वचने शिष्यते तल्लक्षण वृद्धः
श्चेदेव विशेषो भवति। तदिति वृद्धयूनोर्निर्देशः। लक्षणशब्दो निमित्तपर्यायः। चेच्छब्दो यद्यर्थे। एवकारो
ऽवधारणार्थः। विशेषो वैरूप्यं। वृद्धयुवनिमित्तकमेव यदि वैरूप्यं भवति ततो वृद्धः शिष्यते युवा नि-
वर्त्तते समानायामाकृतौ वृद्धयुवप्रत्ययौ भिद्येते। गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ। वात्स्यश्च वात्स्या-
यनश्च वात्स्यौ। वृद्ध इति किम्। गर्गश्च गार्ग्यायणश्च गर्गगार्ग्यायणौ। यूनेति किं। गार्ग्यगर्गौ। तल्लक्षण
श्चेदिति किं। गार्ग्यवात्स्यायनौ। एवकारः किमर्थः। भागवित्तिश्च भागवित्तिकश्च। भागवित्तिभागवित्ति-
कौ। कुत्सा सौवीरत्वं च भागवित्तिकस्यापरो विशेषो विद्यते॥ ६५॥ ॥ स्त्री पुंवच्च॥ ॥ शेष इति वर्त्तते।
वृद्धो यूनेति च सर्वं। स्त्री वृद्धा यूना सह वचने शिष्यते तल्लक्षणश्चेदेव विशेषो भवति पुंवदस्याः
कार्यं भवति स्त्र्यर्थः पुमर्थवद्भवति। गार्गी च गार्ग्यायणश्च गार्ग्यौ। वात्सी च वात्स्यायनश्च वात्स्यौ। दा-
क्षी च दाक्षायणश्च दाक्षी॥ ६६॥ ॥ पुमान् स्त्रिया॥ ॥ तल्लक्षणश्चेदेव विशेष इति वर्त्तते। वृद्धो यूने-

। स च देवदत्तश्च स्यौ॥ त्यदादीनां मिथो यद्यत्परं तत्तच्छिष्यते। सा च यश्च यौ। यश्च कश्च कौ॥ ७२॥ ॥ ग्राम्यपशुसं-
घेष्वतरुणेषु स्त्री॥ ॥ ग्राम्याणां पशूनां संघाः ग्राम्यपशुसंघाः। तेषु सहविवक्षायां स्त्री शिष्यते। पुमान् स्त्रि-
येति पुंसः शेषे प्राप्ते स्त्रीशेषोऽयं विधीयते। अतरुणग्रहणसामर्थ्यात् पशूनां विशेषणं। गाव इमाः। अजा इमाः।
ग्राम्यग्रहणं किम्। रुरव इमे। पृषत इमे। पशुष्विति किं। ब्राह्मणाः क्षत्रियाः। संघेष्विति किं। एतौ गावौ चरतः।
अतरुणेष्विति किं। वत्सा इमे। वर्करा इमे। अनेकशफेष्विति वक्तव्यम्। इह मा भूत्। अश्वा गर्दभाः॥ ७३॥ ॥
॥ एवं ॥ १४८॥ ॥ इति जयादित्यकाशिकायां वृत्तौ प्रथमाध्यायस्य द्वितीयः पादः समाप्तः॥ ॥ भूवादयो धातवः॥
॥ ॥ भू इत्येवमादयः शब्दाः क्रियावाचिनो धातुसंज्ञा भवंति। भू। भवति। एध। एधते। स्पर्द्ध। स्पर्द्धते। धातुशब्दः
पूर्वाचार्य्यसंज्ञा। तेन क्रियावचनानां संज्ञा विधीयते। भूवादीनां वकारोऽयं मंगलार्थः प्रयुज्यते। भुवो वार्थं व-
दंतीति भ्वर्था वा वादयः स्मृताः। धातूपदेशाः। धातोरित्येवमादयः॥ १॥ ॥ उपदेशेऽजनुनासिक इत्॥ ॥
उपदिश्यते तेनेत्युपदेशः। शास्त्रवाक्यानि सूत्रपाठः खिलपाठश्च। तत्र योऽजनुनासिकः स इत्संज्ञो भवति। ए-
धँ। स्पर्द्धँ। प्रतिज्ञानुनासिक्याः पाणिनीयाः। उपदेश इति किं। अभ्र आँ अपः। आ ऊ इति किं। आतो मनिन्क्वनि-
ब्वनिपश्च। मकारस्येत्संज्ञा न भवति। अनुनासिक इति किं। सर्वस्याचो मा भूत्। इत्प्रदेशाः आदितश्चेत्येवमा-
दयः॥ २॥ ॥ हलन्त्यम्॥ ॥ उपदेशे इति वर्त्तते। अंते भवं अंत्यं। धात्वादेः समुदायस्य यदंत्यं हल् तदित्संज्ञं भव

तिनिवृत्तं। स्त्रिया सहवचने पुमान् शिष्यते। स्त्री निवर्तते। स्त्रीपुंसलक्षण एव चेद्विशेषो भवति। ब्राह्मणश्च
ब्राह्मणी च ब्राह्मणौ। कुक्कुटश्च कुक्कुटी च कुक्कुटौ। तल्लक्षण एव चेद्विशेष इत्येव। कुक्कुटश्च मयूरी च कुक्कुटम
यूर्यौ। एवकारः किमर्थः। इंद्रश्च इंद्राणी च इंद्रेंद्राण्यौ। पुंयोगादाख्यायामित्ययमपरो विशेषः। पुमानिति किं। प्राक्
च प्राची च प्राक्प्राच्यौ। प्रागित्यव्ययमलिंगम्॥ ६७॥ ॥ भ्रातृपुत्रौ स्वसृदुहितृभ्याम्॥ ॥ यथासंख्यं भ्रातृपुत्र
शब्दौ शिष्येते स्वसृदुहितृभ्यां सहवचने। स्वसा सहवचने भ्रातृशब्दः शिष्यते। भ्राता च स्वसा च भ्रातरौ। दुहित्रा
सहवचने पुत्रशब्दः शिष्यते। पुत्रश्च दुहिता च पुत्रौ॥ ६८॥ ॥ नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्॥ ॥ तल्लक्ष
ण एव चेद्विशेष इति वर्तते। नपुंसकमनपुंसकमात्रकृते विशेषे अनपुंसकेन सहवचने नपुंसकं शिष्यते। एक
वच्चास्य कार्यमन्यतरस्यां भवति। शुक्लश्च कंबलः शुक्ला च बृहतिका शुक्लं च वस्त्रं। तदिदं शुक्लं। तानीमानि शु
क्लानि। अनपुंसकेनेति किं। शुक्लं च शुक्लं च शुक्लं च शुक्लानि। एकवच्चेति न भवति॥ ६९॥ ॥ पिता मात्रा॥ ॥
अन्यतरस्यामिति वर्तते। नैकवदिति। मात्रा सहवचने पितृशब्दः शिष्यते। अन्यतरस्यां। पिता च माता च पितरौ।
मातापितरौ वेति वा॥ ७०॥ ॥ श्वशुरः श्वश्र्वा॥ ॥ अन्यतरस्यामिति वर्तते। श्वश्र्वा सहवचने श्वशुरशब्दः शिष्य
ते अन्यतरस्यां। श्वश्रूश्च श्वशुरश्च श्वशुरौ। श्वश्रूश्वशुरौ वेति वा॥ ७१॥ ॥ त्यदादीनि सर्वैर्नित्यम्॥ ॥ त्यदादीनि शब्द
रूपाणि सर्वैः सह वचने नित्यं शिष्यते। त्यदादिभिरन्यैश्च। सर्वग्रहणं साकल्यार्थं। नित्यग्रहणं विकल्पनिवृत्त्यर्थं

श्वश्र्व

२८

ति। अइउण् एकारः। ऋलृक् ककारः। एओङ् ङकारः। उपदेश इत्येव। अग्निचित्। सोमसुत्। हस्य ल् हलिति द्वि
तीयमत्र हल्ग्रहणं तंत्रेणोपात्तं द्रष्टव्यं। तेन प्रत्याहारपाठे हलित्यत्र लकारस्य संज्ञा क्रियते। तथा च सति हल् इ
ति प्रत्याहारेनेतरेतराश्रयदोषो भवति॥ ३॥ ॥ न विभक्तौ तुस्माः॥ ॥ पूर्वेण प्राप्तायामित्संज्ञायां विभक्तौ वर्तमा
नानां तवर्गसकारमकाराणां प्रतिषेध उच्यते। तवर्गः। पंचाङ्क्सिङ्कसामिनात्स्याः। वृक्षात्। प्लक्षात्। सकारः।
जस्। ब्राह्मणाः। तस्। थस्। पचतः। पचथः। मकारः। अपचतां। अपचतं। विभक्ताविति किं। अचोयत्। ऊर्णायायु
स्। रुधादिभ्यः श्नम्। किमोत्। इटोदिति वा त्र प्रतिषेधो न भवति। अनित्यत्वादस्य प्रतिषेधस्य इदमस्थमुः इ
त्यकारानुबंधनिर्देशादनित्यत्वमुपलक्ष्यते॥ ४॥ ॥ आदिर्ञिटुडवः॥ ॥ इदिति वर्तते। आदिशब्दः प्रत्येक
मभिसंबध्यते। ञिटुड इत्येतेषां समुदाया आदितो वर्तमाना इत्संज्ञा भवंति। ञिमिदा स्नेहने। भिन्नः। ञिधृषा।
धृष्टः। ञिक्ष्विदा। क्ष्विन्नः। टुवेपृ कंपने। वेपथुः। टुओश्वि। श्वयथुः। डुपचष् पाके। पक्त्रिमं। डुवप्। उप्त्रिमम्। डुकृ
ञ्। कृत्रिमम्। आदिरिति किम्। पटूयति। कंडूयति। उपदेश इत्येव। ञिकारीयति॥ ५॥ ॥ षः प्रत्ययस्य॥ ॥ आदि
रिति वर्तते। षकारः प्रत्ययस्यादिरित्संज्ञो भवति। शिल्पिनि ष्वुन्। नर्तकी। खनकी। रजकी। प्रत्ययस्येति किं। षोड। षं
डः। षडिकः। आदिरित्येव। अविमह्योष्टिषच्॥ अविषो महिषः॥ ६॥ ॥ चुटू॥ ॥ चवर्गटवर्गौ प्रत्ययस्यादितो
वर्तमानावित्संज्ञौ भवतः। गोत्रे कुंजादिभ्यश्च्फञ्। कौंजायन्यः। छस्य ईयादेशं वक्ष्यति। जस्। ब्राह्मणाः। स

२८

स्यां तादेशं वक्ष्यति। शांडिकादिभ्यो ञ्यः। शांडिक्यः। टवर्गः। चरेटः। कुरुचरी। मद्रचरी। टस्येकादेशं वक्ष्यति।
सप्तम्यां जनेर्डः। उपसरजो मंदुरजः। वस्येयादेशं वक्ष्यति। अत्राणः। आत्मन्। पृथग्योगकरणमस्य विधेरनि
त्यत्वज्ञापनार्थं। तेनचित्तश्चुंचुप्चणपौ। केशचुंचुः। केशचणः। अवात्कुटारच्। न तेन। सिकायाः संज्ञायां टी
टञाटज्भ्रटच् इति। अवटीटम्। आदिरित्येवा कर्मणि घटोटच्। कर्मठः॥७॥ ॥लशक्वतद्धिते॥ ॥तद्धितव
र्जितस्य प्रत्ययस्यादितो लकार शकार कवर्गा इत्संज्ञा भवंति। लकारः। ल्युट्। चयनं। पचनं। शकारः। कर्तरि शप्।
भवति। पचति। कवर्गः। क्त क्तवतू निष्ठा। भुक्तः। भुक्तवान्। प्रियवशे वदः खच्। प्रियंवदः। वशंवदः। ग्ला जि
स्थश्च ग्स्नुः। जिष्णुः। भूष्णुः। भंजभासमिदो घुरच्। भंगुरं। भासुरं। टाङसिङसामिनात्स्याः। वृक्षात्। वृक्षस्य
। अतद्धित इति किं। चूडालः। लोमशः। कर्णिका॥८॥ ॥तस्य लोपः॥ ॥तस्येत्संज्ञस्य लोपो भवति। तथा चेवो
दाहृतं। तस्य यद् ग्रहणं सर्वलोपार्थं। अलोन्त्यस्य मा भूत्। आदिर्ञिटुडव इति॥९॥ ॥यथासंख्यमनुदेशः
समानाम्॥ ॥संख्याशब्देन क्रमो लक्ष्यते यथासंख्यं यथाक्रममनुदेशो भवति। अनुदिश्यत इत्यनुदे
शः। पश्चादुच्चार्यत इत्यर्थः। समानां समसंख्यानां समपरिपठितानामुद्देशिनामनुदेशिनां च यथाक्रममु
द्देशिभिः सहानुद्देशिनः संबध्यंते। उदाहरणं। तूदीशलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः। प्रथमात् प्रथमः।
द्वितीयाद् द्वितीय इत्येवमादि। तौदेयः। शालातुरीयः। वार्मतेयः। कौचवार्यः। समानामिति किं। लक्षणेत्थं

तिमयः॥ यत्रान्यसंबंधिनीं क्रियामन्यः करोति इतरसंबंधिनीं चेतरः सः कर्मव्यतिहारः। तद्विशिष्टक्रियावचना
द्धातोरात्मनेपदं भवति। व्यतिलुनते। व्यतिपुनते। कर्मव्यतिहार इति किं। लुनंति। पुनंति। कर्तृग्रहणमुत्तरार्थं।
शेषात्कर्तरि परस्मैपदमिति॥१४॥ ॥न गतिहिंसार्थेभ्यः॥ ॥पूर्वेणात्मनेपदं प्राप्तं प्रतिषिध्यते। गत्यर्थेभ्यो हिं
सार्थेभ्यश्च धातुभ्यश्च कर्मव्यतिहारे आत्मनेपदं न भवति। व्यतिगच्छंति। व्यतिसर्पंति। हिंसार्थेभ्यः। व्यति
हिंसंति। व्यतिघ्नंति। प्रतिषेधे हसादीनामुपसंख्यानं। व्यतिहसंति। व्यतिजल्पंति। व्यतिपठंति। हरतेः प्रतिषे
धः। संप्रहरंते राजानः॥१५॥ ॥इतरेतरान्योन्योपपदाच्च॥ ॥इतरेतरअन्योन्य एवमुपपदाद्धातोरात्म
नेपदं कर्मव्यतिहारे न भवति। इतरेतरस्य व्यतिलुनंति। अन्योन्यस्य व्यतिलुनंति। परस्परोपपदाच्चेति व
क्तव्यं। परस्परं व्यतिलुनंति॥१६॥ ॥नेर्विशः॥ ॥शेषात्कर्तरि परस्मैपदे प्राप्ते निपूर्वाद्विशतेरात्मनेपदं
विधीयते। निःपरस्माद्विशतेरात्मनेपदं भवति। निविशते। निविशंते। नेरिति किं। विशति। प्रविशति। तदा
गमाद्ग्रहणेनेव गृह्यंते। तेन अटा नास्ति व्यवधानम्। न्यविशत इति। नेरुपसर्गस्य ग्रहणम्। अर्थवद्ग्रहणे
नानर्थकस्येति। तस्मादिह न भवति। मधुनि विशंति भ्रमराः॥१७॥ ॥परिव्यवेभ्यः क्रियः॥ ॥डुक्रीञ् द्रव्यविनिमये।
ञित्वात्कर्त्रभिप्राये क्रियाफले इति सिद्धमेवात्मनेपदं। अकर्त्रभिप्राये क्रियाफले यथा स्यात्। परिव्यवेभ्य उत्त
रस्मात् क्रीणातेरात्मनेपदं भवति। परिक्रीणीते। विक्रीणीते। अवक्रीणीते। पर्यादय उपसर्गा गृह्यंते। तेने

क्षुतारव्यानभागवीप्सासु प्रतिपर्य्यनवः। लक्षणादयश्चत्वारोर्थाः प्रत्यादयस्त्रयः। सर्वेषां सर्वत्र कर्म्मप्र
वचनीयसंज्ञा भवति। इह कस्मान्न भवति। वेद्यौयज्ञ आदर्शमिन्धे लः। स्वचेति। स्वरितेनालिंगेन यथासंख्यं
यत्र चेष्यते तत्र स्वरितत्वं प्रतिज्ञायते। स्वरितेनाधिकार इति। स्वरितग्रहणं पूर्वेणापि संबध्यते॥१०॥
॥स्वरितेनाधिकारः॥ ॥स्वरितेनेति इत्थंभूतलक्षणे तृतीया स्वरितो नाम स्वरविशेषो वर्णधर्मः स्तेन चिह्नेनाधिकारो वेदितव्यः। अधिकारो विनियोगः। स्वरितगुणयुक्तं शब्दरूपमेतदधिकृतत्वादुत्तरत्रोपतिष्ठते। प्रतिज्ञास्वरिताः पाणिनीयाः। प्रत्ययः। धातोः। ङ्याप्प्रातिपदिकात्। अंगस्य। भस्य। पदस्य॥११॥ ॥अनुदात्तङित आत्मनेपदम्॥ ॥अविशेषेण धातोरात्मनेपदं परस्मैपदं च विधास्यते। तत्रायं नियमः क्रियते।
अनुदात्तेतो ये धातवो ङितश्च तेभ्य आत्मनेपदं भवति। नान्येभ्यः। अनुदात्तेभ्यः। आस। आस्ते। वस।
वस्ते। ङिद्भ्यः। षूङ्। सूते। शीङ्। शेते॥ ॥१२॥ ॥भावकर्मणोः॥ ॥लः कर्मणि च भावे चाकर्मकेभ्य इति
भावकर्मणोर्विहितस्य लस्यायं तिबादिः अनुदात्तङितः किं भवति। सः सामान्येन लक्ष्यते। तत्रेदमुच्यते।
भावे कर्मणि चात्मनेपदं भवति। भावे। ग्लायते भवता। आस्यते भवता। कर्मणि। क्रियते कटः। ह्रियते भारः। कर्म
कर्तरि। लूयते केदारः स्वयमेवेति परस्मैपदं न भवति। तस्य विधाने द्वितीयं कर्तृग्रहणमनुवर्त्तते कर्तेर्वेयः
कर्त्रा तत्र परस्मैपदं भवति॥१३॥ ॥कर्तरि कर्मव्यतिहारे॥ ॥कर्म्मशब्दः क्रियावाची। व्यतिहारो वि

हतं भवति। बहु विक्रीणन्ति वनमिति॥१८॥ ॥विपराभ्यां जेः॥ ॥शेषात्कर्तरि परस्मैपदमित्यस्यापवादः। विप
रापूर्वाज्जयते र्धातोरात्मनेपदं भवति। विजयते। पराजयते। विपराभ्यामिति किम्। जयति। अभिजयति। विप
राशब्दा बहुपसर्गो गृह्येते। साहचर्य्यात्तेनेह न भवति। बहु विजयति वनं। पराजयति सेना॥१९॥ ॥आङो दोऽना
स्यविहरणे॥ ॥अकर्त्रभिप्रायार्थोयमारंभः। आङ्पूर्वाद्दाञोऽनास्यविहरणे वर्तमानादात्मनेपदं भवति।
विद्यामादत्ते। अनास्यविहरण इति किं॥ आस्यं व्याददाति। आस्यविहरणक्रियादपि प्रतिषेधो वक्तव्यः। विपा
दिकां व्याददाति। कूलं व्याददाति। स्वांगकर्मकाच्चेति वक्तव्यम्। इह मा भूत्। व्याददते पिपीलिकाः पतंगमुखं॥
॥२०॥ ॥क्रीडोऽनुसंपरिभ्यश्च॥ ॥क्रीडृ विहरणे। अस्मादनुसंपरि इत्येवंपूर्वादात्मनेपदं भवति। अनुक्री
डते। संक्रीडते। परिक्रीडते। आङः खल्वपि। आक्रीडते। समोऽकूजन इति वक्तव्यम्। इह मा भूत्। संक्रीडंति शा
कटानि। समासाहचर्यादनुरादिरुपसर्गो गृह्यते। तेन कर्मप्रवचनीययोगे न भवति। माणवकमनुक्रीडति। आ
गमेः क्षमायामात्मनेपदं वक्तव्यं। क्षमा उपेक्षा कालहरणमितियावत्। आगमयस्व तावन्माणवक। शिक्षेर्जि
ज्ञासायाम्। विद्यासु शिक्षते। धनुषि शिक्षते। आशिषि नाथः। सर्पिषो नाथते। मधुनो नाथते। आशिषीति किं।
माणकमेवमनुनाथति। हरतेर्गतिताच्छील्ये। पैतृकमश्वा अनुहरंते। मातृकं गावोऽनुहरंते। गतिताच्छील्य इति किं।
मातुरनुहरति। किरतेर्हर्षजीविकाकुलायकरणेष्विति वक्तव्यम्। हर्षे। अपस्किरते वृषभो हृष्टः। जीविकायां।

अपस्किरते कुक्कुटो भक्ष्यार्थी। कुलायकरणे। अपस्किरते श्वा आश्रयार्थी। ऋ तङ् ज्ञातो॥ अपाच्चतुष्पाच्छकुनि
ष्वालेखने इति सुट्। हर्षादिष्विति किम्। अपकिरति कुसुमं। आङि नुप्रच्छोरुपसंख्यानं। आनुते शृगालः।
आपृच्छते गुरून्। शप उपालंभने इति वक्तव्यं। वाचा शरीरस्पर्शनमुपालंभनं। देवदत्ताय शपते। यज्ञदत्ता
य शपते। उपालंभन इति किं। शपति॥२१॥ ॥समवप्रविभ्यः स्थः॥ ॥ सम् अव प्र वि इत्येवं पूर्वात्तिष्ठतेरा
त्मनेपदं भवति। संतिष्ठते। अवतिष्ठते। प्रतिष्ठते। वितिष्ठते। आङः स्थः प्रतिज्ञान इति वक्तव्यम्। अस्ति स
कारमात्रमातिष्ठते। आदिशब्दाः। आगमौ गुणवृद्धी आतिष्ठते॥२२॥ ॥प्रकाशनस्थेयाख्ययोश्च॥ ॥स्वाभि
प्रायकथनं प्रकाशनं। स्थेयस्याख्या। स्थीयते अस्मिन्निति स्थेयः विवादपदे निर्णयकर्ता निर्णेता लोके
स्थेय इति रूढिः। तस्य प्रतिपत्त्यर्थमाख्याग्रहणम्। प्रकाशने स्थेयाख्यायां च तिष्ठतेरात्मनेपदं भवति
प्रकाशनं तावत्। तिष्ठते कन्या छात्रेभ्यः। तिष्ठते वृषली ग्रामपुरेभ्यः। प्रकाशयत्यात्मानमित्यर्थः। स्थेया
ख्यायां। त्वयि तिष्ठते। मयि तिष्ठते। संशय्य कर्णादि प्रतिष्ठते यः॥२३॥ ॥उदोऽनूर्ध्वकर्मणि॥ ॥उत्पूर्वा
त्तिष्ठतेरनूर्ध्वकर्मणि वर्तमानादात्मनेपदं भवति। कर्मशब्दः क्रियावाची। अनूर्ध्वताविशिष्टक्रियावचना
त्तिष्ठतेरात्मनेपदं भवति। गेहे उत्तिष्ठते। कुटुंबे उत्तिष्ठते। तदर्थं घटत इत्यर्थः। उद ईहायामिति वक्तव्यम्।
इह मा भूत्। ग्रामाच्छतमुत्तिष्ठति। शतमुत्पद्यत इत्यर्थः। ईहाग्रहणमनूर्ध्वकर्मणि एवं विशेषणं त्वाप

मिति। निष्पतति॥२७॥ ॥आङो यमहनः॥ ॥ अकर्मकादिति वर्तते। यम उपरमे। हन हिंसागत्योरिति
परस्मैपदिनौ। ताभ्यामाङ्पूर्वाभ्यामकर्मकक्रियावचनाभ्यामात्मनेपदं भवति। आयच्छते। आयच्छेते। आ
यच्छंते। हन खल्वपि। आहते। आघ्नाते। आघ्नते। अकर्मकादित्येव। आयच्छति कूपाद्रज्जुम्। आहंति
वृषलं पादेन। स्वांगकर्मकाच्चेति वक्तव्यम्। आयच्छते पाणिम्। आहते शिरः। स्वांगं देहपरिभाषिकं संगृह्य
ते। किं तर्हि स्वमंगं स्वांगं। तेनेह न भवति। आहंति शिरः परकीयमिति॥२८॥ ॥समो गम्यृच्छिप्रच्छिस्वरत्यर्ति
श्रुविदिभ्यः॥ अकर्मकादिति वर्तते। शेषात्कर्तरि परस्मैपदे प्राप्ते संपूर्वेभ्यो गम् ऋच्छि प्रच्छि स्वर अर्ति
श्रु विदि इत्येभ्योऽकर्मकेभ्य आत्मनेपदं भवति। संगच्छते। समृच्छते। संपृच्छते। संस्वरते। संकल्पाञ्स्यस हिपर
मरंत। अर्तेर्लुङि च्लेः सर्त्तिशास्त्यर्तिभ्यश्चेत्यङादेशः। तत्रैस्मिन्पदे छिति नाश्रीयते। बहुलं छंदस्यमाङ्यो
गेपि इत्याट् प्रतिषिध्यते। ऋदृशोऽङि गुण इति गुणः। संशृणुते। संवित्ते। ऋच्छेरनादेशस्य ग्रहणम्। स
मृच्छिष्यते। समृच्छिष्यते। अर्त्यादेशस्य त्वर्तेरित्येव सिद्धमात्मनेपदम्। अर्तिश्च भ्य त्रपठ्यते। ऋ गतिप्रापणयो
रिति भ्वादौ। ऋ गताविति जुहोत्यादौ विशेषाभावादुभयोरपि ग्रहणम्। विदेर्ज्ञानार्थस्य ग्रहणं।
परस्मैपदिभिर्मादिभिः साहचर्यात्। न लाभार्थस्य स्वरितेत्वादुभयतोभाषस्य। दृशेश्चेति वक्तव्यं।
संपश्यते। अकर्मकादित्येव। ग्रामं संगच्छति॥२९॥ ॥निसमुपविभ्यो ह्वः॥ ॥अकर्मकादिति निवृत्तं।

वाद्यः। अनूर्ध्वकर्मणीति किं। आसनादुत्तिष्ठति। उपान्मंत्रकरणे॥ ॥उपपूर्वात्तिष्ठतेर्मंत्रकरणे वर्तमाना
दात्मनेपदं भवति। ऐंद्र्या गार्हपत्यमुपतिष्ठते। आग्नेय्याग्नीध्रमुपतिष्ठते। मंत्रकरण इति किं। भर्तार
मुपतिष्ठति यौवनेन॥ उपाद्देवपूजासंगतकरणमित्रकरणपथिष्विति वक्तव्यम्। देवपूजायां। आदित्यमु
पतिष्ठते। संगतकरणे रथिकानुपतिष्ठते। मित्रकरणे। महामात्रानुपतिष्ठते। संगतकरणमित्रकरणयोः
को विशेषः। संगतकरणमुपश्लेषणं। तद्यथा। गंगा यमुनामुपतिष्ठते। मित्रकरणं तु विनाप्युपश्लेषेण
मैत्रीसंधेयः। पथि। अयं पंथाः स्रुघ्नमुपतिष्ठते। वा लिप्सायामिति वक्तव्यं। भिक्षुको ब्राह्मणकुलमुपति
ष्ठते। उपतिष्ठतीति वा॥ २५॥ ॥अकर्मकाच्च॥ ॥उपादिति वर्तते। उपपूर्वात्तिष्ठतेरकर्मकादकर्मकक्रिया
वचनादात्मनेपदं भवति। यावद्भुक्तमुपतिष्ठते। यावदोदनमुपतिष्ठते। भुक्तमिति भावे क्तप्रत्ययः। भोजने भो
जने सन्निधीयत इत्यर्थः। अकर्मकादिति किं। राजानमुपतिष्ठति॥ २६॥ ॥उद्विभ्यां तपः॥ ॥अक
र्मकादिति वर्तते। उद्वि इत्येवंपूर्वात्तपतेरकर्मकक्रियावचनादात्मनेपदं भवति। उत्तपते। वितपते। दीप्य
त इत्यर्थः। अकर्मकादित्येव। उत्तपति सुवर्णं सुवर्णकारः। वितपति पृथिवीं सविता। स्वांगकर्मकाच्चेति व
क्तव्यं। उत्तपते पाणी। वितपते पाणी। उत्तपते पृष्ठं। वितपते पृष्ठं। स्वांगं चेह न पारिभाषिकं गृह्यते। अद्रव
मूर्तिमत्स्वांगमिति किं। तर्हि स्वमंगं स्वांगं। तेनेह न भवति। देवदत्तो यज्ञदत्तस्य पृष्ठमुत्तपति। उद्विभ्या

३१

अतः परं सामान्येनात्मनेपदविधानं तत्र प्रपत्तव्यम्। नि। सम्। उप। वि। इत्येवंपूर्वात् ह्वयतेरात्मनेपदं भवति। निह्वय
ते। संह्वयते। उपह्वयते। विह्वयते। अकर्त्रभिप्रायार्थोऽयमारंभः। तत्र हि ञित्वात् सिद्धमेवात्मनेपदं। उपसर्गादस्यत्यू
ह्योर्वावचनं। निरस्यते। निरस्यति। समूहते। समूहति॥ ३०॥ ॥स्पर्धायामाङः॥ ॥अकर्त्रभिप्रायार्थोऽयमारंभः॥
स्पर्धायां विषये आङ्पूर्वात् ह्वयतेरात्मनेपदं भवति। स्पर्धा संघर्षः। पराभिभवेच्छा। स विषयो धात्वर्थस्य। धातु
स्तु शब्दक्रिय एव। मल्लो मल्लमाह्वयते। छात्रः छात्रमाह्वयते। स्पर्धमानस्तस्याह्वानं करोतीत्यर्थः। स्पर्धायामि
ति किं। गामाह्वयति॥ ३१॥ ॥गंधनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः॥ ॥कर्त्रभि
प्राये क्रियाफले सिद्धमेवात्मनेपदं। अकर्त्रभिप्रायार्थोऽयमारंभः। गंधनादिष्वर्थेषु वर्तमानात् कृञो धातोः करो
तेरात्मनेपदं भवति। गंधनमपकारप्रयुक्तं हिंसात्मकं सूचनं। तथा हि वृत्तिर्गंधन अर्दने। अर्दि हिंसा
यामिति चुरादौ पठ्यते। अवक्षेपणं भर्त्सनं। सेवनमनुवृत्तिः। साहसिक्यं साहसिकं कर्म। प्रतियत्नः सतो
गुणांतराधानं। प्रकथनं प्रकर्षेण कथनं। उपयोगो धर्मादिप्रयोजनो विनियोगः। गंधने तावत्। उत्कु
रुते। उदाकुरुते। सूचयतीत्यर्थः। अवक्षेपणे। श्येनो वर्तिकामवकुरुते। भर्त्सयतीत्यर्थः। सेवने। गणा
कान् प्रकुरुते महामात्रानुपकुरुते। सेवत इत्यर्थः। साहसिक्ये। परदारान् प्रकुरुते। तेषु सहसा प्रवर्तत इ
त्यर्थः। प्रतियत्ने। एधोदकस्योपस्कुरुते। काण्डं गुणस्योपकुरुते। सतो गुणाधानं करोतीत्यर्थः।

तस्य

३२

प्र

षष्ठीसुट्‌च करोतेः प्रतियत्न एव विधीयते। कृञः प्रतियत्न एवेदं त्ये। प्रकथने। गाथाः कुरुते। प्रकर्षेण कथ-
यतीत्यर्थः। उपयोगे। शतं प्रकुरुते। सहस्रं प्रकुरुते। धर्मार्थं शतं विनियुङ्क्त इत्यर्थः। एष्विति किं। कटं क-
रोति॥ ३२॥ ॥ अधेः प्रसहने॥ ॥ अकर्त्रभिप्रायार्थोयमारम्भः। अधिपूर्वात्करोतेः। असहने वर्त्तमा-
नादात्मनेपदं भवति। प्रसहनमभिभवः। अपराजयो वा। तमधिकुरुते। तमधिचक्रे। तमभिबभूव। न चाते-
न पराजित इत्यर्थः। प्रसहने इति किं। अर्थमधिकरोति। पृथग्योगकरणमुपसर्गविशेषार्थं॥ ३३॥ ॥ वेः
शब्दकर्मणः॥ ॥ कृञ इत्यनुवर्त्तते। विपूर्वात्करोतेरकर्त्रभिप्राये क्रियाफले शब्दकर्मण आत्मनेपदं भवति।
कर्मशब्द इह कारकाभिधायी न क्रियावचनः। क्रोष्टा विकुरुते स्वरान्। ध्वांक्षो विकुरुते स्वरान्। शब्दकर्मण
इति किं। विकरोति पयः॥ ३४॥ ॥ अकर्मकाच्च॥ ॥ वेः कृञ इत्यनुवर्त्तते। विपूर्वात्करोतेरकर्मकादकर्मक-
क्रियावचनादात्मनेपदं भवति। विकुर्वते सैन्धवाः। साधु दान्ताः शोभनं वल्गन्तीत्यर्थः। ओदनस्य पूर्णाः छा-
त्रा विकुर्वते॥ ३५॥ ॥ संमाननोत्संजनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः॥ ॥ णीञ् प्रापणे। कर्त्र-
॥ निःफलं चेष्टन्त इत्यर्थः। अकर्मकादिति किं। कटं विकरोति। =भिप्राये क्रियाफले सिद्धमेवात्मनेपदं [ति]।
अकर्त्रभिप्रायार्थोयमारम्भः। संमाननादिषु सत्सु विशेषणेषु नयतेर्धातोरात्मनेपदं भवति। संमा-
ननं पूजनं। नयते चार्वी लोकायते। चार्वी बुद्धिस्तत्संबन्धादाचार्योपि चार्वी उच्यते। स लोकायते शास्त्रे पदा-

स्वर्गे। व्याकरणाध्ययनाय क्रमते बुद्धिः। श्लोकाध्ययनाय क्रमते। उत्सहत इत्यर्थः। तायते। अस्मिन् शास्त्राणि क्र-
मन्ते। स्फीतीभवन्तीत्यर्थः। एष्विति किम्। अपक्रामति। क्रमः परस्मैपदेष्विति दीर्घः॥ ३८॥ ॥ उपपराभ्यां॥ ॥ वृ-
त्तिसर्गतायनेष्विति वर्त्तते। उपपरापूर्वात्क्रमेर्वृत्त्यादिष्वर्थेषु वर्त्तमानादात्मनेपदं भवति। किमर्थमिदमुच्य-
ते। उपसर्गनियमार्थो सोपसर्गात् उपपरापूर्वादेव नान्यपूर्वादिति। उपक्रमते। पराक्रमते। उपपराभ्यामिति
किम्। संक्रामति। वृत्त्यादिष्वित्येव। उपक्रामति। पराक्रामति॥ ३९॥ ॥ आङ उद्गमने॥ ॥ आङ्पूर्वात्क्रम-
तेरुद्गमने वर्त्तमानादात्मनेपदं भवति। आक्रमते आदित्यः। आक्रमते चन्द्रमाः। आक्रमन्ते ज्योतींषि। उद्ग-
मन इति किं। आक्रामति माणवकः कुतपं। ज्योतिरुद्गमने इति वक्तव्यं। इह मा भूत्। आक्रामति धूमो हर्म्यतलम्।
॥ ४०॥ ॥ वेः पादविहरणे॥ ॥ विपूर्वात्क्रमतेः पादविहरणार्थे वर्त्तमानादात्मनेपदं भवति। विहरणं विक्षे-
पः। सुष्टु विक्रमते। अश्वादीनां गतिविशेषो विक्रमणमुच्यते। यद्यपि च क्रमिः पादविहरण एव पठ्यते। क्रमु
पादविक्षेप इति। तथाप्यनेकार्थत्वाद्धातूनामुपसर्गाभ्यां परस्मात्क्रमतेरात्मनेपदं भवति। तौ चेत्प्रोपौ सम-
र्थौ तुल्यार्थौ भवतः। क्व चानयोस्तुल्यार्थता। आदिकर्मणि। प्रक्रमते भोक्तुं। उपक्रमते भोक्तुं। समर्थाभ्यामि-
ति किम्। पूर्वेद्युः प्रक्रामति। गच्छतीत्यर्थः। अपरेद्युरुपक्रामति। आगच्छतीत्यर्थः। अथोपपराभ्यामित्यनेना-
त्मनेपदमत्र कस्मान्न भवति। वृत्त्यादिग्रहणं तत्रानुवर्त्तते। ततोऽत्रेदं प्रत्युदाहरणं॥ ४२॥ ॥ अनुप

३३

र्थं नयते। गमयति। उपपत्तिभिः स्थिरीकृत्य शिष्येभ्यः प्रतिपादयति। तेन युक्तिभिः स्थाप्यमानाः सं
मानिताः पूजिता भवंति। उत्संजनमुत्क्षेपणं। माणवकमुदानयते। उत्क्षिपतीत्यर्थः। आचार्य्यकरणं। आचा
र्य्यक्रियामाणवकमुपनयते। माणवकमीदृशेन विधिना स्वसमीपं प्रापयति। येनासौ उपनेतास्याचार्य
ः संपद्यते। माणवकमुपनयते। आचार्यः कुर्वन्माणवकमात्मसमीपं नयतीत्यर्थः। ज्ञानं प्रमेयनिश्च
यः। नयते चार्वी लोकायते। तत्र प्रमाणमा प्रमेयं निश्चिनोतीत्यर्थः। भृतिर्वेतनं। कर्मकरानुपनयते। भृति
दानेन समीपीकरोतीत्यर्थः। विगणनं ऋणादेर्निर्यातनं। मद्राः करं विनयंते। निर्यातयंतीत्यर्थः। व्ययो
विनियोगः। शतं विनयते। सहस्रं विनयते। धर्माद्यर्थं शतं सहस्रं वा प्रयुंक्त इत्यर्थः। एतेष्विति किं। अ
जां नयति ग्रामं।।३६।। कर्तृस्थे चाशरीरे कर्मणि।। ।।नयतेः कर्ता देवदत्तादिर्लकारवाच्यः। तत्रस्थे कर्म
णि अशरीरे सति नयतेरात्मनेपदं भवति। शरीरं प्राणिकायस्तदेकदेशोपि शरीरं। क्रोधं विनयते। म
न्युं विनयते। कर्तृस्थ इति किं। देवदत्तो यज्ञदत्तस्य क्रोधं विनयति। अशरीर इति किं। गंडं विनयति। घा
टां विनयति। कर्मणीति किं। बुद्ध्या विनयति। प्रज्ञया विनयति।।३७।। ।।वृत्तिसर्गतायनेषु क्रमः।। ।।शेषा
त्कर्तरि परस्मैपदे प्राप्ते। इत्यादिष्वर्थेषु क्रमेर्धातोरात्मनेपदं भवति। वृत्तिरप्रतिबंधः। सर्ग उत्साहः।
तायनं स्फीतता। वृत्तौ तावत्। ऋक्ष्वस्य क्रमते बुद्धिः। यजुःष्वस्य क्रमते बुद्धिः। न प्रतिहन्यत इत्यर्थः।

३३

३४

र्गादृशा।। ।।अप्राप्तविभाषेयं क्रम इति वर्तते। उपसर्गाद्विमुक्तात् क्रमेरात्मनेपदं भवति। क्रमते। क्रामति।
अनुपसर्गादिति किम्। संक्रामति।।४३।। ।।अपह्नवे ज्ञः।। ।।शेषात्कर्तरि परस्मैपदे प्राप्ते जानातेरपह्नवे व
र्तमानादात्मनेपदं भवति। अपह्नवो निह्नुतिरपलापः। सोपसर्गश्चायमपह्नवे वर्तते न केवलः। शतमप
जानीते। अपलपतीत्यर्थः। अपह्नव इति किं। न त्वं किंचिदपि जानासि।।४४।। ।।अकर्मकाच्च।। ।।अके
र्त्रभिप्रायार्थोयमारंभः। कर्त्रभिप्राये ह्यनुपसर्गाच्च ज्ञ इति वक्ष्यति। अकर्मकादकर्मकक्रियावचनाज्जा
नातेरात्मनेपदं भवति। सर्पिषो जानीते। मधुनो जानीते। कथं चायमकर्मकः नात्र सर्पिरादि कर्मत्वेन वि
वक्षितम्। किं तर्हि ज्ञानं प्रवृत्तिकायाः प्रवृत्तौ करणत्वेन तथा हि ज्ञो विदर्थस्य करण इति षष्ठी विधीयते। स
र्पिषो जानीते। मधुनो जानीते। सर्पिषा उपायेन प्रवर्तत इत्यर्थः। अकर्मकादिति किम्। स्वरेण पुत्रं जाना
ति।।४५।। ।।संप्रतिभ्यामनाध्याने।। ।।ज्ञ इति वर्तते।। सकर्मकार्थोयमारंभः। संप्रतिपूर्वाज्जानातेरनाध्या
ने वर्तमानादात्मनेपदं भवति। अनाध्यानमनुत्कंठा। शतं संजानीते। सहस्रं संजानीते। शतं प्रतिजानीते।
सहस्रं प्रतिजानीते। अनाध्यानमिति किं। मातुः संजानाति। पितुः संजानाति। उत्कंठत इत्यर्थः।।४६।।
।।भासनोपसंभाषाज्ञानयत्नविमत्युपमंत्रणेषु वदः।। ।।शेषात्कर्तरि परस्मैपदे प्राप्ते भासनादिष्वर्थे
षु विशेषणेषु सत्सु वदेरात्मनेपदं भवति। भासनं दीप्तिः। वदते चार्वी लोकायते। भासनं दीप्यमानः।

मा

३४

सूत्रपदार्थनक्रीत्यर्थः। उपसंभाषा उपसांत्वनं। कर्मकरानुपवदते। उपसांत्वयतीत्यर्थः। ज्ञानं। सम्यगवबो
धः। वदते चार्वी लोकायते। जानाति वदितुमित्यर्थः। यत्न उत्साहः। क्षेत्रे वदते। गेहे वदते। तद्विषय
मुत्साहमाविःकरोतीत्यर्थः। विमतिर्नानामतिः। क्षेत्रे विवदंते। गेहे विवदंते। विमतिपतिता विचित्रभाषंत
इत्यर्थः। उपमंत्रणं रहस्युपच्छंदनं। कुलभार्यामुपवदते। परदारानुपवदते। उपच्छंदयतीत्यर्थः। एतेष्विति किं।
यत्किंचिद्वदति॥४७॥ ॥व्यक्तवाचां समुच्चारणे॥ ॥वद इत्यनुवर्त्तते। व्यक्तवाचां समुच्चारणं सहोच्चार
णं। तत्र वर्तमानाद्वदतेरात्मनेपदं भवति। ननु वद व्यक्तायां वाचीत्येव पठ्यते। तत्र किं व्यक्तवाचामि
ति विशेषणेन। अप्रसिद्ध्युपसंग्रहार्थमेतद् व्यक्तवाच इति मनुष्याः प्रसिद्धाः तेषां समुच्चारणे यथा स्यात्। सं
प्रवदंते ब्राह्मणाः। संप्रवदंते क्षत्रियाः। व्यक्तवाचामिति किं। अपनयपादसरोजमंकतः शिथिलय बाहुलतां ग
लाद्द्रुतं। ध्रुववदमं शुकमाकुलीकृतं वरतनु संप्रवदंति कुक्कुटाः। समुच्चारण इति किं। ब्राह्मणो वदति। क्ष
त्रियो वदति॥४८॥ ॥अनोरकर्मकात्॥ वद इति वर्त्तते। व्यक्तवाचामिति च। अनुपूर्वाद्वदतेरकर्मकात् व्य
क्तवाग्विषयादात्मनेपदं भवति। अनुवदते कठः कलापस्य। अनुवदते मोदः पैप्पलादस्य। अनुः सादृश्ये
यथा कलापोधीयानो वदति तथा कठ इत्यर्थः। अकर्मकादिति किं। पूर्वमेव यजुरुदितमनुवदति। व्यक्तवा
चामित्येव। अनुवदति वीणा॥४९॥ ॥विभाषा विप्रलापे॥ ॥ वद इति वर्त्तते। व्यक्तवाचां समुच्चारण इति

पुनरुच्यते इति अतः प्रत्युदाहरणं भवति॥५४॥ ॥दाणश्च सा चेच्चतुर्थ्यर्थे॥ ॥दाण दाने परस्मैपदी। ततः सं
पूर्वात्तृतीयायुक्तादात्मनेपदं भवति। सा चेत्तृतीया चतुर्थ्यर्थे भवति। कथं पुनस्तृतीया चतुर्थ्यर्थे स्यात्। वक्त
व्यमेवैतत्। अशिष्टव्यवहारे तृतीया चतुर्थ्यर्थे भवतीति वक्तव्यम्। दास्या संप्रयच्छते। वृषल्या संप्रयच्छते। का
मुकः सन् दास्यै ददातीत्यर्थः। चतुर्थ्यर्थ इति किं। पाणिना संप्रयच्छति। समः प्रत्याह्वेन व्यवधाने कथमात्मनेप
दं भवति। सम इति विशेषणषष्ठी न पंचमी॥५५॥ ॥उपाद्यमः स्वकरणे॥ ॥यमो धातोः कर्त्तरि परस्मैपदे प्राप्ते
उपपूर्वाद्यमः स्वकरणे आत्मनेपदं भवति। पाणिग्रहणं विशिष्टमिह स्वकरणं गृह्यते। न स्वकरणमात्रं।
भार्यामुपयच्छते। कन्यामुपयच्छते। स्वकरणमिति किं। देवदत्तो यज्ञदत्तस्य भार्यामुपयच्छति॥५६॥ ॥ज्ञा
श्रुस्मृदृशां सनः॥ ॥ ज्ञा श्रु स्मृ दृश इत्येतेषां सन्नंतानामात्मनेपदं भवति। तत्र जानातेरपवर्के वेत्येव इति वि
भिः सूत्रैरात्मनेपदं विहितं। श्रुदृशोरपि समो गम्यृच्छिप्रच्छि इत्यत्र विहितं। तस्मिन् विषये पूर्ववत्सन इत्येव
सिद्धमात्मनेपदं। ततोन्यत्र विधीयते विधानं स्मरतेः पुनरप्राप्तमेव। धर्मं जिज्ञासते। गुरुं शुश्रूषते। न
ष्टं सुस्मूर्षते। नृपं दिदृक्षते। सन इति किं। जानाति। शृणोति। स्मरति। पश्यति॥५७॥ ॥नानोर्ज्ञः॥ ॥पूर्वे
ण प्राप्तमात्मनेपदं अनेन प्रतिषिध्यते। अनुपूर्वाज्जानातेः सन्नंतादात्मनेपदं न भवति। तथाहि वसतिस
कर्मकस्यैवायं प्रतिषेधः। पुत्रमनुजिज्ञासति। भार्यामनुजिज्ञासति। अनोरिति किम्॥ धर्मं जिज्ञासते॥५८॥

च विरुद्धः प्रलापो विप्रलापः। विप्रलापात्मके व्यक्तवाचां समुच्चारणे वर्त्तमानाद् वदते र्विभाषाऽऽत्मनेपदं भव
ति। प्राप्तविभाषेयं॥ विप्रवदंते। सांवत्सराः विप्रवदंति सांवत्सराः। विप्रवदंते मौहूर्ताः विप्रवदंति मौहूर्ताः।
युगपत्परस्परं विप्रतिषेधेन विरुद्धं वदंतीत्यर्थः। विप्रलाप इति किं। संप्रवदंते। ब्राह्मणाः। व्यक्तवाचामित्ये
व। विप्रवदंति शकुनयः। समुच्चारण इत्येव। क्रमेण मौहूर्ता मौहूर्तेन सह विप्रवदंति॥५०॥ ॥अवाद्ग्रः॥
॥ ॥गॄ निगरणे इति तुदादौ पठ्यते तस्येदं ग्रहणं। न तु गॄ शब्दे इति क्र्यादिपठितस्य तस्य ह्यवपूर्वस्य प्रयोगए
व नास्ति। शेषादिति परस्मैपदे प्राप्ते अवपूर्वाद्गिरतेरात्मनेपदं भवति। अवगिरते। अवगिरंते। अवादिति किं।
गिरति॥ समः प्रतिज्ञाने॥ ॥इति वर्त्तते। संपूर्वाद्गिरतेः प्रतिज्ञाते वर्त्तमानादात्मनेपदं भवति। प्रतिज्ञानमभ्यु
पगमः। प्रतिश्रवोंगीकरणं। शतं संगिरंते। सहस्रं संगिरंते। नित्यं शब्दं संगिरंते। संज्ञे सर्वज्ञं संगिरंते। प्रतिज्ञानत्र
ति किं। संगिरति ग्रासं॥ ॥५२॥ उदश्चरः सकर्मकात्॥ ॥शेषात्कर्त्तरि परस्मैपदे प्राप्ते। उत्पूर्वाच्चरतेः सकर्म
कात्सकर्मकक्रियावचनादात्मनेपदं भवति। गेहमुच्चरते। कुटुंबमुच्चरते। गुरुवचनमुच्चरते। उत्क्रम्य ग
च्छतीत्यर्थः। सकर्मकादिति किं। बाष्पमुच्चरति॥ ॥५३॥ ॥समस्तृतीयायुक्तात्॥ ॥संपूर्वाच्चरतेस्तृ
तीयायुक्तादात्मनेपदं भवति। तृतीयेति। तृतीया विभक्तिर्गृह्यते। तया चरते रर्थद्वारको योगः। अश्वेन सं
चरते। तृतीयायुक्तादिति किं। उभौ लोकौ संचरसि इमं चामुं च देवल। यद्यप्यत्र तदर्थयोगः संभवति। तृतीया

३५

श्रि०

॥ ॥प्रत्याङ्भ्यां श्रुवः॥ ॥प्रति आङ् इत्येवं पूर्वाच्छृणोतेः सन्नंतादात्मनेपदं भवति। प्रतिशुश्रूषति। आशु
श्रूषति। उपसर्गग्रहणं चेदं तस्मादिह प्रतिषेधो न भवति। देवदत्तं प्रतिशुश्रूषते॥५९॥ ॥शदेः शितः॥ ॥शद्लृ शा
तने। परस्मैपदी। तस्मादात्मनेपदं विधीयते। शिद्भाविनः शदेरात्मनेपदं भवति। शीयते। शीयंते। शित इति
किं। शशाद। शत्स्यति। अशत्स्यत्। शिशत्सति॥६०॥ ॥म्रियतेर्लुङ्लिङोश्च॥ ॥मृङ् प्राणत्यागे। ङित्वादा
त्मनेपदं सिद्धमेव। नियमार्थमिदं वचनं। म्रियतेर्लुङ्लिङोः शितश्चात्मनेपदं भवति नान्यत्र। अमृत। मृ
षीष्ट। शितः खल्वपि म्रियते। नियमः किमर्थः। मरिष्यति। अमरिष्यत्॥६१॥ ॥पूर्ववत्सनः॥ ॥सनः पूर्वो
यो धातुरात्मनेपदी तद्वत्सन्नंतादात्मनेपदं भवति। आंस्ते येन निमित्तेन पूर्वस्मादात्मनेपदं विधीयते। तेनैव
सन्नंतादपि भवति। अनुदात्तङित आत्मनेपदं। आस्ते शेते। सन्नंतादपि तदेव निमित्तं। आसिसिषते। शिशयि
षते। नेर्विशः। निविशते। निविविक्षते। आङ उद्गमने। आक्रमते। आचिक्रंसते। इह न भवति। शिशत्सति।
मुमूर्षति। नहि शदिम्रियतिमात्रमात्मनेपदनिमित्तं। किं तर्हि शिद्वाद्यपीति तच्चेह नास्ति। यस्य च पूर्वत्रैवानिमि
त्तभावः प्रतिषिध्यते। तत्सनंतेप्यनिमित्तं। अनुचिकीर्षति। पराचिकीर्षति। इह जुगुप्सते मीमांसते इत्यनु
दात्तेत इत्यात्मनेपदं भवति। अवयवे कृतं लिंगं समुदायस्य विशेषकं भवति॥६२॥ ॥आम्प्रत्ययवत्कृञो
ऽनुप्रयोगस्य॥ ॥अकर्त्रभिप्रायार्थोयमारंभः॥ ॥आम्प्रत्ययो यस्माद्विहितः सोयमाम्प्रत्ययः। आम्प्रत्य

३६

यस्यैव धातोः कृञोऽनुप्रयोगस्यात्मनेपदं भवति। ईक्षांचक्रे। ईहांचक्रे। यदि विध्यर्थमेतत्। तर्हि उम्भांचका
रेति कर्त्रभिप्राये क्रियाफले आत्मनेपदं भवतीति प्राप्नोति। नैष दोषः। उभयमनेन क्रियते विधिर्नियमश्च। कथं त्व
र्ववदिति वर्तते। सद्वितीयो यत्नोऽभिविष्यति। कृञ इति किम्। ईहां बभूव। कथं पुनरस्यानुप्रयोगो यावता कृञ्यो
नुप्रयुज्यते लिटि इत्युच्यते। कृञिति प्रत्याहारग्रहणं तत्र विज्ञायते। कृ सं भ्व स्तीनां प्रत्याहारः। अभूततद्भा
वे कृभ्वस्तियोग इति कृञः शब्दादारभ्य यावत् कृञो द्वितीयस्तृतीय इति कृञ एकारः। ६३। ॥प्रोपाभ्यां युजेरय
ज्ञपात्रेषु॥ ॥युजिर् योगे। स्वरितेत्तस्य कर्त्रभिप्राये क्रियाफले सिद्धमेवात्मनेपदमकर्त्रभिप्रायार्थमि
मारम्भः। प्र उप इत्येतस्मात् युजेरयज्ञपात्रविषयादात्मनेपदं भवति। प्रयुङ्क्ते। उपयुङ्क्ते। अयज्ञपात्रेष्वि
ति किम्। द्वन्द्वं न्यञ्चा पात्राणि प्रयुनक्ति धीरः। स्वराद्यन्तोपसृष्टादिति वक्तव्यं। उद्युङ्क्ते। नियुङ्क्ते। स्वराद्युप
सृष्टादिति किम्। निर्युनक्ति। दुर्युनक्ति। ६४॥ ॥समः क्ष्णुवः॥ ॥क्ष्णु तेजने परस्मैपदी। ततः संपूर्वादात्मनेप
दं भवति। समो गम्यृच्छिप्रच्छि इत्यत्रैवायं कस्मान्न पठितः। अकर्मकादिति तत्रानुवर्तते। संक्ष्णुते शस्त्रं। संक्ष्णु
वाते। संक्ष्णुवते। सम इति किम्। विक्ष्णोति। ६५। ॥भुजोऽनवने॥ ॥भुज पालनाभ्यवहारयोः। रुधादिः पठ्य
ते। तस्मादनवने पालने वर्तमानादात्मनेपदं भवति। भुङ्क्ते। भुञ्जाते। भुञ्जते। अनवन इति किं। भुनक्त्ये
नमग्निराहितः। अनवनप्रतिषेधेन रौधादिकस्यैव ग्रहणं विज्ञायते। न तौदादिकस्य नेह न भवति। निर्भुन

बिभेतेः स्मयतेश्च ण्यन्तादात्मनेपदं भवति। हेतुभये। हेतुः प्रयोजकः कर्ता लकारवाच्यः। ततश्चेद्भयं भवति। भय
ग्रहणमुपलक्षणार्थम्। विस्मयोऽपि तत एव। मुण्डो भीषयते। मुण्डो भापयते। जटिलो भीषयते। जटिलो विस्मा
पयते। मुण्डो विस्मापयते। नित्यं स्मयतेरित्याकारः। हेतुभय इति किम्। कुञ्चिकयैनं भाययति। रूपेण विस्मापय
ति। अत्र कुञ्चिका भयस्य कारणं न हेतुः। ६८। ॥गृधिवञ्च्योः प्रलम्भने॥ ॥णेरिति वर्तते। अकर्त्रभिप्रायार्थो
यमारम्भः। गृधु अभिकाङ्क्षायाम्। वञ्चु गतौ। इत्येतयोर्ण्यन्तयोः प्रलम्भने वर्तमानयोरात्मनेपदं भवति।
प्रलम्भनं विसंवादनं मिथ्याफलाख्यानं। माणवकं गर्धयते। माणवकं वञ्चयते। प्रलम्भन इति किं। श्वानं गर्धयति।
गर्धनमस्योत्पादयतीत्यर्थः। अहिं वञ्चयति। परिहरतीत्यर्थः। ६९। ॥लियः सम्माननशालीनीकरणयोश्च॥ ॥
णेरिति वर्तते। अकर्त्रभिप्रायार्थोयमारम्भः। लीङ् श्लेषणे दिवादौ पठ्यते। ली श्लेषणे इति क्र्यादौ विशे
षाभावात् द्वयोरपि ग्रहणं। [illegible]यो ण्यन्तात् सम्माननशालीनीकरणयोर्वर्तमानादात्मनेपदं भवति। चशब्दात्
प्रलम्भने च। सम्माननं सम्पूजनं। शालीनीकरणं न्यग्भावनं। जटाभिर्लापयते। पूजामधिगच्छतीत्यर्थः। श्ये
नो वर्तिकामुल्लापयते। न्यक्करोतीत्यर्थः। प्रलम्भने खल्वपि। कस्त्वामुल्लापयते। को विसंवादयतीत्यर्थः। वि
भाषा लीयतेरित्याकारो णौ वा विधीयते। तदस्मिन् विषये नियमोऽन्यत्र विकल्पः। व्यवस्थितविभाषा हि सा।
सम्माननादिष्विति किम्। बालकमुल्लापयति। ७०। ॥मिथ्योपपदात्कृञोऽभ्यासे॥ ॥णेरिति वर्तते। अ

३७

तिपाणि।।६६।। ।।णेरणौ यत्कर्म णौ चेत्स कर्तानाध्याने।। ।।णिचश्चेति कर्त्रभिप्राये क्रियाफले सिद्धमेवा
त्मनेपदं अकर्त्रभिप्रायार्थोयमारंभः। ण्यंतादात्मनेपदं भवति। कथं। अणौ यत्कर्म णौ चेत्तदेव कर्म स एव कर्ता
भवति। अनाध्याने आध्यानं वर्जयित्वा। आरोहंति हस्तिनं हस्तिपकाः। आरोहयते हस्ती स्वयमेव। उपसिंचंति
हस्तिनं सेवकाः। उपसेचयते हस्ती स्वयमेव। पश्यंति भृत्या राजानं। दर्शयते राजा स्वयमेव। णेरिति किम्।
आरोहंति हस्तिनं हस्तिपकाः। आरोह्यमाणो हस्ती साध्वारोहति। अणाविति किम्। गणयति गणं गो
पालः। गणयति गणः स्वयमेव। कर्मग्रहणं किम्। दात्रेण लुनाति। लावयति दात्रं स्वयमेव। णौ चेद्ग्रहणं किम्।
समानक्रियार्थं। आरोहंति हस्तिनं हस्तिपकाः। आरोह्यमाणो हस्ती भीतान् सेचयति मूत्रेण। यसग्रहण
मनन्यकर्मार्थं। आरोहंति हस्तिनं हस्तिपकाः। आरोह्यमाणो हस्ती स्थलमारोहयति मनुष्यान्। कर्त्तेति किम्।
आरोहंति हस्तिनं हस्तिपकाः। तानारोहयति महामात्रः। अनाध्यान इति किं। स्मरति वनगुल्मस्य कोकि
लः। स्मारयंत्येनं वनगुल्माः स्वयमेव। ननु चात्र कर्मकर्तरि मूलोदाहरणानि। तत्र कर्मवद्भावेनैव सिद्ध
मात्मनेपदं किमर्थमिदमुच्यते। कर्मस्थभावकानां कर्मस्थक्रियाणां च कर्मवदित्यतिदेशो विधीयते।
कर्तृस्थार्थोयमारंभः। तथा वक्ष्यति। कर्तृस्थक्रियः। इति। कर्तृस्थभावः उदाहरणम्। अपरिस्पंदरूपो धात्व
र्थोभावः। परिस्पंदरूपा क्रिया।।६७।। ।।भीस्म्योर्हेतुभये।। ।।णेरिति वर्तते। अकर्त्रभिप्रायार्थोयमारंभः।

३७

श्री०

३८

कर्त्रभिप्रायार्थोयमारंभः। ण्यंतात्करोतेर्मिथ्योपपदादात्मनेपदं भवति। अभ्यासे। अभ्यासः पुनःपुनः क
रणमावृत्तिः। पदं मिथ्या कारयते। सापराधं स्वरादिदुष्टमसकृदुच्चारयतीत्यर्थः। मिथ्योपपदादिति किम्। प
दं सुष्ठु कारयति। कृञ इति किम्। पदं मिथ्या वाचयति। अभ्यास इति किम्। पदं मिथ्या कारयति। सकृदुच्चा
रयतीत्यर्थः।।७१।। ।।स्वरितञितः कर्त्रभिप्राये क्रियाफले।। ।।णेरिति निवृत्तं। ज्ञो वा। कर्तरि परस्मैपदे प्राप्ते
स्वरितेतो ये धातवो ञितश्च तेभ्य आत्मनेपदं भवति। कर्त्रभिप्राये क्रियाफले गम्यमाने। कर्तारं चेत् क्रिया
फलमभिप्रैति। क्रियायाः फलं क्रियाफलं। प्रधानभूतं। यदर्थमसौ क्रिया रभ्यते तच्चेत्कर्तृलकारवाच्यस्य
भवति। यजते। पचते। ञितः खल्वपि। सुनुते। कुरुते। स्वर्गादिकं प्रधानं फलमिह कर्तारमभिप्रैति। स्वरि
त इति किम्। तरति। अतरति। कर्त्रभिप्राय इति किम्। यजंति याजकाः। पचंति पाचकाः। कुर्वंति कर्मकराः।
यद्यपि दक्षिणाप्रभृति कर्तृस्थफलमिहास्ति तथापि न तदर्थः क्रियारंभः।।७२।। ।।अपाद्वदः।। ।।कर्त्रभि
प्राय इति वर्तते। अपपूर्वाद्वदतेः कर्त्रभिप्राये क्रियाफले आत्मनेपदं भवति। धनकामो न्यायमपवदते। न्या
यापवादेन धनमर्जयिष्यामीति मन्यते। कर्त्रभिप्राये क्रियाफल इत्येव। अपवदति।।७३।। ।।णिचश्च।। ।।
कर्त्रभिप्राये क्रियाफल इति अनुवर्त्तते। णिजंतादात्मनेपदं भवति। कर्त्रभिप्राये क्रियाफले। कटं कारयते।
ओदनं पाचयते। कर्त्रभिप्राय इत्येव कारयति परस्य कटं।।७४।। ।।समुदाङ्भ्यो यमोऽग्रंथे।। ।।कर्त्रभिप्राय

३८

इतिवर्त्तते। समुत्आङ्‌ इत्येवं सूर्वात् यमेः कर्त्रभिप्राये क्रियाफले आत्मनेपदं भवति। अग्रंथे ग्रंथविषयश्चेत्प्रयो
गो न भवति। व्रीहीन् संयच्छते। भारमुद्यच्छते। वस्त्रमायच्छते। आङ् सूर्वादकर्मकाद् आङो यमहन इति सिद्धमेवात्मने
पदं। सकर्मकार्थमिदं पुनर्ग्रहणं। अग्रंथ इति किं। उद्यच्छति चिकित्सां वैद्यः। कर्त्रभिप्राय इत्येव। संयच्छति। उद्यच्छति।
आयच्छति॥७५॥ ॥अनुपसर्गाज्ज्ञः॥ ॥कर्त्रभिप्राय इति वर्त्तते। अनुपसर्गाज्ज्ञा नातेः कर्त्रभिप्राये क्रियाफले आत्मने
पदं भवति। गां जानीते। अश्वं जानीते। अनुपसर्गादिति किं। स्वर्ग्लोकं न प्रतिजानासि मूढ। कर्त्रभिप्राय इत्येव। देवदत्तस्य
गां जानाति विष्णुमित्रः॥७६॥ ॥विभाषोपपदेन प्रतीयमाने॥ ॥स्वरितञित इत्यादिभिः पंचभिः सूत्रैरात्मनेपदं कर्तृ
अभिप्राये क्रियाफले द्योत्ये विहितं तदुपपदेन द्योतिते न प्राप्नोतीति वचनमिदमारभ्यते। समीपेश्रूयमाणंशब्दा
तरमुपपदं। तेन प्रतीयमाने कर्त्रभिप्राये क्रियाफले विभाषात्मनेपदं भवति। स्वं यज्ञं यजते। यजति वा। स्वं कटं कुरु
ते करोति वा। स्वं पुत्रमपवदते। अपवदति वा। एवं पंच सूत्राण्युदाहार्याणि॥७७॥ ॥शेषात्कर्तरि परस्मैपदम्॥
पूर्वेण प्रकरणेनात्मनेपदनियमः कृतः परस्मैपदमनियतं तत्सर्वतः प्राप्नोतीति तदर्थमिदमारभ्यते। येभ्यो धातुभ्यो
येन विशेषणेनात्मनेपदं संनियुक्तं। अतो यदन्यत्स शेषः। शेषात्कर्तरि परस्मैपदं भवति शेषादेव नान्यस्मात्।
अनुदात्तङित आत्मनेपदमुक्तम्। आस्ते शेते। ततोन्यत्र परस्मैपदं भवति। याति। वाति। नेर्विशः। आत्म
नेपदमुक्तम्। निविशते। ततोन्यत्र परस्मैपदं। आविशति। प्रविशति। कर्तरीति किम्। पच्यते। गम्यते। कृ

ति। उपरमयतीति यावत्। अंतर्भावितण्यर्थोत्र रमिः। पृथग्योगकरणमुत्तरार्थम्। अकर्मकाद्विभाषां वक्ष्यति। सोप
सर्गाद्यथा स्यात्॥८४॥ ॥विभाषाकर्मकात्॥ ॥रम उपादिति वर्त्तते। पूर्वेण नित्ये परस्मैपदे प्राप्ते विकल्प आरभ्यते।
उपपूर्वाद्रमतेरकर्मकाद्विभाषा परस्मैपदं भवति। यावद्भुक्तमुपरमति। यावद्भुक्तमुपरमते। तावन्निवर्त्तत इत्यर्थः।
॥८५॥ ॥बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः॥ ॥णिचश्चेति कर्त्रभिप्राय क्रियाफलविवक्षायामात्मनेपदे प्राप्ते
परस्मैपदं विधीयते। बुध। युध। नश। जन। इङ्। प्रु। द्रु। स्रु। इत्येतेभ्यो ण्यंतेभ्यः परस्मैपदं भवति। बोधयति। योध
यति। नाशयति। जनयति। अध्यापयति। प्रावयति। द्रावयति। स्रावयति। येत्राकर्मकास्तेषामणावकर्मकाच्चित्तव
त्कर्तृकादित्येव सिद्धे वचनमचित्तवत्कर्तृकार्थं। योधयति काष्ठानि। बोधयति पद्मं। नाशयति दुःखं। जनयति सुखं।
प्रुद्रुस्रुवस्रु चलनार्था अपि तेभ्यो निगरणचलनार्थेभ्यश्चेति सिद्धे यदाज्वलनार्थास्तदर्थं वचनं। प्रवर्त्तते प्राप्नोतीति
गम्यते। आपो द्रवंति। विलीयंत इत्यर्थः। कुंडिका स्रवति। स्पंदत इत्यर्थः। तद्विषया एवोदाहरणानि॥८६॥ ॥निग
रणचलनार्थेभ्यश्च॥ ॥णेरिति वर्त्तते। कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदापवादः परस्मैपदं विधीयते।
निगरणमभ्यवहारः। चलनं कंपनं। निगरणार्थेभ्यश्च चलनार्थेभ्यश्च धातुभ्यो ण्यंतेभ्यः परस्मैपदं भ[illegible]। नि
गारयति। आशयति। भोजयति। चलनार्थेभ्यश्च। चलयति। चोपयति। कंपयति। अयमपि योगः [illegible]का
र्थः। अचित्तवत्कर्तृकार्थश्च। अदेः प्रतिषेधो वक्तव्यः। अत्ति देवदत्तः। आदयते देवदत्तेन॥८७॥

तरि कस्मात् परस्मैपदं न भवति। पच्यते ओदनः स्वयमेव। कर्तरि कर्मव्यतिहार इति द्वितीयं कर्तृग्रहणमनु
। तेन कर्तैव यः कर्ता तत्र परस्मैपदं भवति। कर्मकर्तरि न भवति॥७८॥ ॥अनुपराभ्यां कृञः॥ ॥कर्त्रभिप्राये
याफले गंधनादिष्वर्थेषु च करोतेरात्मनेपदं विहितं तदपवादः परस्मैपदं विधीयते। अनुपरेत्येवं पूर्वात् करोते
परस्मैपदं भवति। अनुकरोति। पराकरोति॥७९॥ ॥अभिप्रत्यतिभ्यः क्षिपः॥ ॥क्षिप प्रेरणे स्वरितेत्। ततः क
र्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदे प्राप्ते परस्मैपदं विधीयते। अभिप्रति अति इत्येवं पूर्वात् क्षिपः परस्मैपदं
भवति। अभिक्षिपति। प्रतिक्षिपति। अतिक्षिपति। अभिप्रत्यतिभ्य इति किं। आक्षिपते। द्वितीयमपि कर्तृग्रहण
मनुवर्तते। तेनेह न भवति॥८०॥ ॥प्राद्वहः॥ ॥वह प्रापणे स्वरितेत्। अतः कर्त्रभिप्रायक्रियाफलविवक्षायामा
त्मनेपदे प्राप्ते परस्मैप=अभिक्षिप्यते स्वयमेव।=दं विधीयते। प्रपूर्वाद्वहतेः परस्मैपदं भवति। प्रवहति गंगा। प्रा
दिति किम्। आवहते॥८१॥ ॥परेर्मृषः॥ ॥मृष तितिक्षायाम्। स्वरितेत्। ततः तथैवात्मनेपदे प्राप्ते परस्मैपदं विधी
यते। परिपूर्वान्मृषेर्धातोः परस्मैपदं भवति। परिमृष्यति। परिमृष्यतः। परिमृष्यंति। परेरिति किं। आमृष्यते। वह
तिमपि केचिदनुवर्तयंति। परिवहति॥८२॥ ॥व्याङ्परिभ्यो रमः॥ ॥रमु क्रीडायामनुदात्तेत्। आत्मनेपदे प्राप्ते ततः पर
स्मैपदं विधीयते। वि आङ् परि इत्येवं पूर्वात् रमतेः परस्मैपदं भवति। विरमति। आरमति। परिरमति। व्याङ्प
रिभ्य इति किम्। अभिरमते॥८३॥ ॥उपाच्च॥ ॥रम इत्येव। उपपूर्वाद्रमतेः परस्मैपदं भवति। देवदत्तमुपरम

र्मकाच्चित्तवत्कर्तृकात्॥ ॥णेरिति वर्तते। कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदापवादः स्मै [illegible]
यते। अण्यंतो यो धातुरकर्मकश्चित्तवत्कर्तृकश्च तस्मात् ण्यंतात् परस्मैपदं भवति। आस्ते देवदत्तः। आस [illegible] द
त्तम्। शेते देवदत्तः। शाययति देवदत्तम्। अण इति किम्। चेतयमानं प्रयोजयति। चेतयते इति केचित्। प्र [illegible] ह
रंति। तदयुक्तं। हेतुमणि चो विधिः प्रतिषेधोपि प्रत्यासत्तेस्तस्यैव न्याय्यः। तस्मादिह चेतयतीति परस्मैपदेनैव भ
वितव्यम्। इदं तु प्रत्युदाहरणं। आरोहयमाणं प्रयोजयति आरोहयते। अकर्मकादिति किम्। कटं कुर्वाणं प्रयोज
यति कारयते। चित्तवत्कर्तृकादिति किम्। शुष्यंति व्रीहयः। शोषयते व्रीहीनातपः॥८८॥ ॥न पादम्याङ्यमाङ्य
सपरिमुहरुचिनृतिवदवसः॥ ॥पूर्वेण योगद्वयेन निगरणचलनार्थेभ्यश्च अणावकर्मकाच्चित्तवत्कर्तृकादिति।
कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदापवादः। परस्मैपदं विहितं। तस्य प्रतिषेधोयमुच्यते। यत्र कर्त्रभि
प्रायक्रियाफलविषयं परस्मैपदं तदवस्थितमेव न प्रतिषिध्यते। पा दमि आङ्यम्। आङ्यस। परिमुह रुचि नृति
वद वस इत्येतेभ्यो ण्यंतेभ्यः परस्मैपदं न भवति। णिचश्चेत्यात्मनेपदमेव भवति। पिबति निगरणार्थः। दमिप्र
भृतयश्चित्तवत्कर्तृकाः। नृतिश्चलनार्थोपि तेषां परस्मैपदं न भवति। पा। पाययते। दमि। दमयते। आङ्यम्। आ
यामयते। यमोऽपरिवेषण इति मित्संज्ञा प्रतिषिध्यते। आङ्यस। आयासयते। परिमुह। परिमोहयते। रुचि। रो
चयते। नृति। नर्तयते। वद। वादयते। वस। वासयते। पादिषु धेट उपसंख्यानं। धापयेते शिशुमेकं समीची

॥८९॥ ॥वा क्यषः॥ ॥लोहितादिडाज्भ्यः क्यषिति वक्ष्यति। वा तदंताद्धातोः परस्मैपदं भवति। शेषादिति नित्ये प्राप्ते
विकल्पार्थं वचनं। लोहितायति। लोहितायते। पटपटायति। पटपटायते। अथात्र परस्मैपदेन मुक्ते कथमात्मनेप
दं लभ्यते। यावतानुदात्तङित इत्येवमादिना प्रकरणेन तन्नियतं। एवं तर्ह्यात्मनेपदमेवात्र विकल्पितं विधीयते। त
दानंतरं परस्मैपदप्रतिषेधेन संनिधापितमिह संबध्यते। तेन मुक्ते शेषात्कर्तरि परस्मैपदं भविष्यति॥९०॥ ॥
॥द्युद्भ्यो लुङि॥ ॥वेत्येव। द्युत दीप्तौ। तत्साहचर्यात् श्वितादयोपि कृपूपर्यंतास्तथैव व्यपदिश्यंते। बहुवचननिर्दे
शादाद्यर्थौतिर्भवति। अनुदात्तेत्वान्नित्यमात्मनेपदे प्राप्ते द्युतादिभ्यो लुङि परस्मैपदं वा भवति। व्यद्युतत्। व्य
द्योतिष्ट। अलुठत्। अलोठिष्ट। अलुभत्। अलोभिष्ट। लुङीति किम्। द्योतते॥९१॥ ॥वृद्भ्यः स्यसनोः॥ ॥द्युता
दिष्वेव वृतादयः पठ्यंते। वृतु वर्तने। वृधु वृद्धौ। शृधु शब्दकुत्सायाम्। स्यंदू प्रस्रवणे। कृपू सामर्थ्ये। इत्येतेभ्यः
स्यसनि च परतो वा परस्मैपदं भवति। वर्त्स्यति। अवर्त्स्यत्। विवृत्सति। वर्तिष्यते। अवर्तिष्यत। विवर्तिषते। वृ
ध। वर्त्स्यति। अवर्त्स्यत्। विवृत्सति। वर्धिष्यते। अवर्धिष्यत। विवर्धिषते। स्यसनोरिति किम्। वर्तते॥९२॥ ॥लुटि
च क्लृपः॥ ॥कृपेर्वृतादित्वादेव स्यसनोर्विकल्पः सिद्धः। लुटि विधीयते। चकारस्तर्हि स्यसनोरनुकर्षणार्थो
न वक्तव्यः। एवं तर्हीयं प्राप्तिः क्लृपः पूर्वप्राप्तिं बाधेत। तस्माच्चकारः स्यसनोरनुकर्षणार्थः क्रियते। लुटि च
स्यसनोश्च क्लृपेः परस्मैपदं वा भवति। कल्प्ता। कल्प्तारौ। कल्प्स्यति। अकल्प्स्यत्। विक्लृप्सति। कल्पिता। कल्पि

ब्रह्मबंधूः। वीरवधूः। यवागूः। यू इति किम्। मात्रे दुहित्रे। देहि। स्त्र्याख्याविति किं। हे ग्रामणीः। सेनानीः। खलपूः। आ
ख्याग्रहणं किं। शब्दार्थे स्त्रीत्वे एवं यथा स्यात्। पदांतरद्योत्ये मा भूत्। ग्रामण्ये स्त्रियै। खलप्वे स्त्रियै। नदीप्रदेशाः।
आण्नद्याः इत्येवमादयः॥३॥ ॥नेयङुवङ्स्थानावस्त्री॥ ॥पूर्वेणातिप्रसक्ता नदीसंज्ञा प्रतिषिध्यते। स्थितिः स्था
नं। इयङुवङोः स्थानमनयोरिति इयङुवङ्स्थानौ। यौ यू तौ नदीसंज्ञौ न भवतः। स्त्रीशब्दं वर्जयित्वा। हे श्रीः। हे भ्रूः।
अस्त्रीति किं। हे स्त्रि॥४॥ ॥वामि॥ ॥पूर्वेण नित्ये प्रतिषेधे प्राप्ते आमि विकल्पः। इयङुवङ्स्थानौ यौ यू तौ वा आ
मि षष्ठीबहुवचने नदीसंज्ञौ भवतः। श्रीणाम्। श्रियाम्। भ्रूणां। भ्रुवां। अस्त्रीत्येव। स्त्रीणाम्॥५॥ ॥ङिति ह्रस्व
श्च। दीर्घस्य नदीसंज्ञा विहिता। ह्रस्वस्य न प्राप्नोति। इयङुवङ्स्थानयोश्च प्रतिषिद्धा। तस्मात् ङिति वा विधीयते
। ङिति परतः ह्रस्वश्च यः संबंधी यः स्त्र्याख्यः। इयङुवङ्स्थानौ च यू। वा नदीसंज्ञौ भवतः। कृत्यै। कृतये। धेन्वै।
धेनवे। श्रियै। श्रिये। भ्रुवै। भ्रुवे। अस्त्रीत्येव। स्त्रियै। स्त्र्याख्यावित्येव। अग्नये। वायवे। भानवे॥६॥ ॥शेषो घ्यस
खि॥ ॥ह्रस्व इति वर्तते। शेषो घिसंज्ञो भवति। सखिशब्दं वर्जयित्वा। कश्च शेषः। ह्रस्वमिवर्णोवर्णांतं। यन्न स्त्र्या
ख्यं। स्त्र्याख्यं च यत्र नदीसंज्ञं स शेषः। अग्नये। वायवे। धेनवे। कृतये। असखीति किम्। सख्या। सख्ये। सख्युः। स
ख्यौ। घिप्रदेशाः। घेर्ङिति इत्येवमादयः॥७॥ ॥पतिः समास एव॥ ॥पतिशब्दस्य घिसंज्ञायां प्राप्तायां नि
यमः क्रियते। पतिशब्दः समास एव घिसंज्ञो भवति। प्रजापतिना। प्रजापतये। समास इति किम्। पत्या।

४१

ष्यते। अकल्पिष्यत। विकल्पिषते। अव परस्मैपदे तत्रतासि वक्लृपट् तीइ प्रतिषेधः। यत्रात्मनेपदं तत्रेट् भवत्ये
॥१३॥ ॥ इति कातन्त्रिकायां वृत्तौ प्रथमस्याध्यायस्य तृतीयः पादः समाप्तः॥ सूत्रं एवं १३॥ ॥ आकडारादेका संज्ञा।
॥ ॥ आकडारात् कर्मधारय इति वक्ष्यति। आ एतस्मात् सूत्रावधेर्यानीत ऊर्ध्वमनुक्रमिष्यामस्तत्कौत्रैसंज्ञा भवतीत्ये
वं वेदितव्यम्। का पुनरसौ या परा अनवकाशा च। अन्यत्र संज्ञासमावेशान्नियमार्थं वचनं। एकैव संज्ञा भवतीति।
वक्ष्यति। ह्रस्वं लघु। भिद्। छिद्। संयोगे गुरु। शिक्षि। भिक्षि। शिक्षा। भिक्षा। संयोगपरस्य ह्रस्वस्य लघुसंज्ञा प्राप्नो
ति गुरुसंज्ञा च। एकासंज्ञेति वचनाद् गुरुसंज्ञैव भवति। अततक्षत्। अररक्षत्। सन्वल्लघुनि चङ्परे इत्येष विधि
र्न भवति॥१॥ ॥विप्रतिषेधे परं कार्यम्॥ ॥ विरोधो विप्रतिषेधः॥ यत्र द्वौ प्रसंगावन्यार्थावेकस्मिन् युगपत्प्राप्नु
तः स विप्रतिषेधः। स तुल्यबलविरोधो विप्रतिषेधः। तस्मिन् विप्रतिषेधे परं कार्यं भवति। उत्सर्गापवाद नित्या
नित्यान्तरंगबहिरंगेषु तुल्यबलत्वं नास्तीति नायमस्य योगस्य विषयो बलवतैव तत्र भवितव्यम्। अप्रवृत्तौ पर्या
येण वा प्रवृत्तौ प्राप्तायां वचनमिदमारभ्यते। अतो दीर्घो यि जि। सुपि चेत्यस्यावकाशः। वृक्षाभ्यां। प्लक्षाभ्यां। बहु
वचने झल्येत् इत्यस्यावकाशः। वृक्षेषु। प्लक्षेषु। इहोभयं प्राप्नोति। वृक्षेभ्य इति। परं भवति विप्रतिषेधेन॥२॥ ॥यू
स्त्र्याख्यौ नदी॥ ॥ ईच ऊच यू। अविभक्तिकोऽयं निर्देशः। स्त्रियमाचक्षाते इति स्त्र्याख्यौ। मूलविभुजादिदर्शनात्
कः। ईकारान्तमूकारान्तं च स्त्र्याख्यं शब्दरूपं नदीसंज्ञं भवति। ईकारान्तं कुमारी। गौरी। ग्रा डुः रवी। लक्ष्मीः। उकारान्तं।

४१

१०

४२

पत्यः। पत्यौ। कथमन्यत्र पतिना सहेति। छन्दसि सर्वे विधयो विकल्प्यन्ते। छान्दसोऽयं प्रदोषः। एवकारकरणमिध
धारणार्थं। दृढमुष्टिना। दृढमुष्टये॥ ॥ षष्ठीयुक्तश्छन्दसि वा॥ ॥ पतिरिति वर्तते। पूर्वेण नियमाद् समा
प्राप्नोतीति वचनमारभ्यते। षष्ठ्यन्तेन शब्देन युक्तः पतिशब्दश्छन्दसि विकल्पेन घिसंज्ञो भवति। कुलुञ्चानां पतये
नमः। कुलुञ्चानां पत्ये नमः। क्षेत्रस्य पतये। क्षेत्रस्य पत्ये। षष्ठीयुक्त इति किं। मया पत्या जरदष्टिर्यथासः। छन्दसी
ति किम्। ग्रामस्य पत्ये॥९॥ ॥ ह्रस्वं लघु॥ ॥ मात्रिकस्यान्त्यो ह्रस्वसंज्ञा विहिता तस्यानेन लघुसंज्ञा विधीयते। ह्र
स्वमक्षरं लघुसंज्ञं भवति। छेत्ता। भेत्ता। अचीकरत्। अजीहरत्। लघुप्रदेशाः। पुगन्तलघूपधस्य वा दीर्घो लघो
रित्येवमादयः॥१०॥ ॥ संयोगे गुरु॥ ॥ ह्रस्व इति वर्तते। पूर्वेण लघुसंज्ञायां प्राप्तायां गुरुसंज्ञा विधीयते। सं
योगे परतो ह्रस्वमक्षरं गुरुसंज्ञं भवति। कुण्डा। हुण्डा। शिक्षा। गुरुप्रदेशाः। गुरोश्च हल इत्येवमादयः॥११॥ ॥
॥दीर्घं च॥ ॥ संयोग इति नानुवर्तते। सामान्येन संज्ञाविधानं। दीर्घमक्षरं गुरुसंज्ञं भवति। ईहांचक्रे। ऊहांचक्रे।
॥१२॥ ॥ यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्॥ ॥ यस्मात् प्रत्ययो विधीयते धातोर्वा प्रातिपदिकाद्वा तदादि
शब्दरूपं प्रत्यये परतो अंगसंज्ञं भवति। कर्ता। हर्ता। करिष्यति। हरिष्यति। अकरिष्यत्। अहरिष्यत्। औपगवः।
कापटवः। यस्मादिति संज्ञिनिर्देशार्थं। तदादीति संबंधात्। प्रत्ययग्रहणं किं। न्यविशत। व्यक्रीणीत। नेर्विशः
इत्युपसर्गाद्विधिरस्ति तदादेरंगसंज्ञा स्यात्। विधिग्रहणं किं। प्रत्ययपरत्वमात्रेण माभूत्। स्त्री इयती। तदादि

४२

वचनं स्यादिति तमर्थं करिष्यावः करिष्यामि। कुण्डानि। पुनः प्रत्ययग्रहणं किम्। अर्थी। अंगप्रदेशाः। अंगस्येत्येवमा
दयः॥१३॥ ॥सुप्तिङंतं पदं॥ ॥सुप्तिङिति प्रत्याहारग्रहणम्। सुबंतं तिङंतं च शब्दरूपं पदसंज्ञं भवति। ब्राह्मणाः
पचंति। पदसंज्ञायामंतग्रहणमन्यत्र संज्ञाविधौ प्रत्ययग्रहणे तदंतविधेः प्रतिषेधार्थं। गौरी। ब्राह्मणितरा। पद
प्रदेशाः। पदस्य। पदादित्येवमादयः॥१४॥ ॥नः क्ये॥ ॥क्य इति क्यच् क्यङ् क्यषां सामान्येन ग्रहणम्। नांतं शब्द
रूपं क्ये परतः पदसंज्ञं भवति। क्यच्। राजीयति। क्यङ्। राजायते। क्यष्। चर्मायते। सिद्धे सत्यारंभो नियमार्थः।
नांतमेव क्ये परतः पदसंज्ञं भवति नान्यत्। वाच्यति। स्रुच्यति॥१५॥ ॥सिति च॥ ॥यचि भमिति वक्ष्यति। त
स्यायं पुरस्तादपकर्षः। सिति प्रत्यये परतः पूर्वं पदसंज्ञं भवति। भवतः ठक्छसौ। भवदीयः। ऊर्णायुस्। ऊर्णा
युः। ऋतोरण्। छंदसि घस्। ऋत्वियः॥१६॥ ॥स्वादिष्वसर्वनामस्थाने॥ ॥स्वादिष्विति सुशब्दादेकवचना
दारभ्य आ कपः प्रत्ययाः परिगृह्यंते। स्वादिषु प्रत्ययेषु परतः सर्वनामस्थानवर्जितेषु पूर्वं पदसंज्ञं भवति। रा
जभ्यां। राजभिः। राजत्वं। राजता। राजतरः। राजतमः। असर्वनामस्थान इति किं। राजानौ। राजानः॥१७॥॥
॥ ॥स्वादिष्वसर्वनामस्थान इति वर्त्तते। पूर्वेण पदसंज्ञायां प्राप्तायां तदपवादो भसंज्ञा विधीयते। यकारा
दावजादौ च स्वादौ सर्वनामस्थानवर्जिते प्रत्यये परतः पूर्वं भसंज्ञं भवति। यकारादौ। गार्ग्यः। वात्स्यः। अजा
दौ। दाक्षिः। साक्षि॥ नभोङ्गिरोमनुषां वत्युपसंख्यानं। नभ इव नभस्वत्। अङ्गिरा इव अङ्गिरस्वत्। म

कारक इति विशेषणमपादानादिसंज्ञाविषयमधिक्रियते कारक इत्यधिकारो वेदितव्यः। यदित ऊर्द्धमनुक्र
मिष्यामः। कारक इत्येवं वेदितव्यं। कारकशब्दश्च निमित्तपर्यायः। कारकं निमित्तं हेतुरित्यनर्थांतरं। कस्य हेतुः
क्रियाया इति वक्ष्यति। ध्रुवमपायेऽपादानम्। ग्रामादागच्छति। पर्वतादवरोहति। कारक इति किं। वृक्षस्य प
र्णं पतति। कुड्यस्य पिंडं पतति। अकथितं च कारकं कर्मसंज्ञं भवति। माणवकं पन्थानं पृच्छति। कारक इति किम्। मा
णवकस्य पितरं पंथानं पृच्छति। कारकसंज्ञाशब्देन तु स्वानेनैव विशेषणेन व्यवहारो वेदितव्यः॥२३॥ ॥ध्रुवम
पायेऽपादानम्॥ ॥ध्रुवं यदपायमुक्तं। अपाये साध्ये यदवधिभूतं तत्कारकमपादानसंज्ञं भवति। ग्रामादाग
च्छति। पर्वतादवरोहति। सार्थाद्धीनः। रथात्पतति। जुगुप्साविरामप्रमादार्थानामुपसंख्यानं। अधर्माज्जुगु
प्सते। अधर्माद्विरमति। धर्मात्प्रमाद्यते। अपादानप्रदेशाः। अपादाने पंचमीत्येवमादयः॥२४॥ ॥भीत्रार्थानां
भयहेतुः॥ ॥बिभेत्यर्थानां धातूनां प्रयोगे त्रायत्यर्थानां च भयहेतुर्यत्कारकमपादानसंज्ञं भवति। चौरे
भ्यो बिभेति। चौरेभ्य उद्विजते। त्रायत्यर्थानां। चौरेभ्यस्त्रायते। चौरेभ्यो रक्षति। भयहेतुरिति किम्। अर
ण्ये बिभेति। अरण्ये त्रायते॥२५॥ ॥पराजेरसोढः॥ ॥परापूर्वस्य जयतेः प्रयोगेऽसोढो योऽर्थः सोढुं न
शक्यते तत्कारकमपादानसंज्ञं भवति। अध्ययनात्पराजयते। अध्ययनं सोढुं न शक्यत इत्यर्थः। असोढ इ
ति किं। शत्रून्पराजयते॥२६॥ ॥वारणार्थानामीप्सितः॥ ॥वारणार्थानां धातूनां प्रयोगे ईप्सितो यो

नुरिवमनुषत्। वृषण्वस्वश्वयोः। वृषण् इत्येतद् वस्वश्वयोः परतो भसंज्ञं भवति छन्दसि विषये। वृषण्वसुः। वृष
ण्वश्वः। अत्र देशाः। भस्येत्येव माद्यः ॥१८॥ ॥ तसौ मत्वर्थे ॥ ॥ भमिति वर्त्तते। नकारान्तं सकारान्तं च शब्दरू
पं मत्वर्थे प्रत्यये परतो भसंज्ञं भवति। उदश्वित्वान् घोषः। विद्युत्वान् बलाहकः। सकारान्तः। पयस्वी। ओजस्वी।
४२ तसाविति किम्। तक्षवान् ग्रामः ॥१९॥ ॥ अयस्मयादीनि छन्दसि ॥ ॥ अयस्मयादीनि शब्दरूपाणि छन्दसि विषये
साधूनि भवन्ति। भसंज्ञा पदसंज्ञाधिकारे वचनात् तेन मुखेन साधुत्वमयस्मयादीनां विधीयते। अयस्मयं
वर्म। अयस्मयानि पात्राणि। अयस्मयीभिः। ऋक्वद्भिः उभयमपि भवति। स सुष्टुभा स ऋक्वता गणेन। पदत्वात् कु
त्वं। भत्वात् जश्त्वं न भवति। छन्दसीति किम्। अयोमयं वर्म ॥२०॥ ॥ बहुषु बहुवचनम् ॥ ॥ ङ्याप्प्रातिपदिका
त् इति स्वादयो लस्येति चादय इति सामान्येन बहुवचनं विहितं। तस्यानेन बहुत्वसंख्यावाच्यत्वेन विधीयते
। बहुषु बहुवचनं भवति। बहुत्वमस्य वाच्यं भवतीति यावत्। कर्मादयोप्यपरे विभक्तीनामर्था वाच्यास्तदा च ब
हुत्वे बहुवचनं। कर्मादिषु बहुषु बहुवचनमित्यर्थः। ब्राह्मणाः पचन्ति। यत्र च संख्या संभवति। तत्राप्यसुपदे
शाः अव्ययेभ्यस्तु तिःसंख्येभ्यः सामान्यविहिताः स्वादयो भवन्त्येव ॥२१॥ ॥ द्व्येकयोर्द्विवचनैकवचने ॥ ॥ ४२
॥ द्वित्वैकत्वयोरर्थयोर्द्विवचनैकवचने भवतः। एतदपि सामान्यविहितयोर्द्विवचनैकवचनयोरर्थाभिधा
नं। द्वित्वे द्विवचनं भवति। एकत्वे एकवचनं भवति। ब्राह्मणो पचति। ब्राह्मणः पचति ॥२२॥ ॥ कारके ॥ ॥

१०
र्थस्तत्कारकमपादानसंज्ञं भवति। प्रवृत्तिविघातो वारणं। यवेभ्यो गाः वारयति। ईप्सित इति किम्। यवेभ्यो गां वार
यति क्षेत्रे ॥२७॥ ॥ अन्तर्धौ येनादर्शनमिच्छति ॥ ॥ व्यवधानमन्तर्द्धिः। अन्तर्द्धिनिमित्तं येनादर्शनमात्मन इच्छति तत्का
४४ रकमपादानसंज्ञं भवति। उपाध्यायादन्तर्द्धत्ते। उपाध्यायान्निलीयते। मा मामसौ उपाध्यायो माद्राक्षीदिति निलीयते ॥
अन्तर्धाविति किम्। चौरान्न दिदृक्षते। इच्छतिग्रहणं किं। अदर्शने इच्छायां सत्यां सत्यपि दर्शने यथा स्यात् ॥२८॥ ॥ आ
ख्यातोपयोगे ॥ ॥ आख्याता प्रतिपादयिता। उपयोगो नियमपूर्वकं विद्याग्रहणं। उपयोगे साध्ये आख्याता यस्त
त्कारकमपादानसंज्ञं भवति। उपाध्यायादधीते। उपाध्यायादागमयति। उपयोग इति किम्। नटस्य शृणोति। ग्रन्थि
कस्य शृणोति ॥२९॥ ॥ जनिकर्तुः प्रकृतिः ॥ ॥ जनेः कर्त्ता जनिकर्त्ता। जन्यर्थस्य जननः कर्त्ता जायमानस्तस्य या
प्रकृतिः कारणं हेतुस्तत्कारकमपादानसंज्ञं भवति। शृङ्गाच्छरो जायते। गोमयाद्वृश्चिको जायते ॥३०॥ ॥ भुवः प्रभ
वः ॥ ॥ कर्तुरिति वर्त्तते। भवनं भूः प्रभवत्यस्मादिति प्रभवः। भुवः कर्तुः प्रभवो यस्तत्कारकमपादानसंज्ञं भवति। हि
मवतो गंगा प्रभवति। काश्मीरेभ्यो वितस्ता प्रभवति। प्रथमत उपलभ्यत इत्यर्थः ॥३१॥ ॥ कर्मणा यमभिप्रैति स
संप्रदानम् ॥ ॥ कर्मणा करणभूतेन यमर्थमभिप्रैति तत्कारकं संप्रदानसंज्ञं भवति। अन्वर्थसंज्ञाविज्ञानात् ददा
तिकर्मणेति विज्ञायते। उपाध्यायाय गां ददाति। माणवकाय भिक्षां ददाति। क्रियाग्रहणमपि कर्त्तव्यं। क्रियया पि ४४
यमभिप्रैति स संप्रदानं। श्राद्धाय निगर्हते। युद्धाय संनह्यते। पत्ये शेते। संप्रदानप्रदेशाः चतुर्थी संप्रदाने इत्ये

वमादयः कर्मणः करणसंज्ञा वक्तव्या संप्रदानस्य कर्मसंज्ञा। पशुना रुद्रं यजते। पशुं रुद्राय ददातीत्यर्थः॥३२॥
॥रुच्यर्थानां प्रीयमाणः॥ ॥रुचिना समानार्थानां रुच्यर्थाः। अन्यकर्तृकोभिलाषो रुचिः। रुच्यर्थानां धातूनां प्रयोगे प्रीय
माणो योर्थस्तत्कारकं संप्रदानसंज्ञं भवति। देवदत्ताय रोचते मोदकः। यज्ञदत्ताय स्वदते मोदकः। देवदत्तस्थस्याभि
लाषस्य मोदकः कर्ता। प्रीयमाण इति किम्। देवदत्ताय रोचते मोदकः पथि॥३३॥ ॥श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः
॥ ॥श्लाघह्नुङ्स्थाशप इत्येतेषां ज्ञीप्स्यमानो योर्थस्तत्कारकं संप्रदानसंज्ञं भवति। ज्ञीप्स्यमानो ज्ञापयितुमिष्य
माणो बोधयितुमभिप्रेतः। देवदत्ताय श्लाघते। देवदत्तं श्लाघमानस्तां श्लाघां तमेव ज्ञापयितुमिच्छतीत्यर्थः। ए
वं देवदत्ताय ह्नुते। देवदत्ताय तिष्ठते। यज्ञदत्ताय तिष्ठते। देवदत्ताय शपते। यज्ञदत्ताय शपते। ज्ञीप्स्यमान इति किं।
देवदत्ताय श्लाघते पथि॥३४॥ ॥धारेरुत्तमर्णः॥ ॥धारयतेर्ण्यन्तोः प्रयोगे उत्तमर्णो योर्थस्तत्कारकं संप्रदानसं ते
ज्ञं भवति। उत्तममृणं यस्य स उत्तमर्णः। कस्य वोत्तममृणं। यदीयं धनं धनस्वामी प्रयोक्ता उत्तमर्णः संप्रदान
संज्ञो भवति। देवदत्ताय शतं धारयति। यज्ञदत्ताय सहस्रं धारयति। उत्तमर्ण इति किम्। देवदत्ताय शतं धारय
ति ग्रामे॥३५॥ ॥स्पृहेरीप्सितः॥ ॥स्पृह ईप्सायां चुरादावदन्तः पठ्यते। स्पृहयतेः प्रयोगे ईप्सितो योर्थस्तत्कार
कं संप्रदानसंज्ञं भवति। ईप्सित इत्यभिप्रेत उच्यते। पुष्पेभ्यः स्पृहयति। फलेभ्यः स्पृहयति। ईप्सित इति किम्। पु
ष्पेभ्यः स्पृहयति वने॥३६॥ ॥क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः॥ ॥अमर्षः क्रोधः। अपकारो द्रोहः। अक्ष

गृणाति। पोत्रे अनुगृणाति। होत्रे प्रतिगृणाति। पोत्रे प्रतिगृणाति। होता प्रथमं शंसति। तमन्यः प्रोत्साहयति। अनु
गरः प्रतिगर इति हि शंसितुः प्रोत्साहनमुच्यते। होत्रे अनुगृणाति। होतारं शंसंतं प्रोत्साहयतीत्यर्थः॥४१॥ ॥
॥साधकतमं करणं॥ ॥क्रियासिद्धौ यत्प्रकृष्टोपकारकं विवक्षितं तत्साधकतमं करणसंज्ञं भवति। दात्रेण लुना
ति। परशुना छिनत्ति। तमग्रहणं किम्। गंगायां घोषः। कूपे गर्गकुलमिति॥४२॥ ॥दिवः कर्म च॥ ॥पूर्वेण क
रणसंज्ञायां प्राप्तायां कर्मसंज्ञा विधीयते। दिवः साधकतमं यत्कारकं तत्कर्मसंज्ञं भवति। चकारात्करणसंज्ञं
च। अक्षान्दीव्यति। अक्षैर्दीव्यति॥४३॥ ॥परिक्रयणे संप्रदानमन्यतरस्याम्॥ ॥साधकतममिति वर्तते। पूर्वे
ण करणसंज्ञायां प्राप्तायां संप्रदानसंज्ञा पक्षे विधीयते। परिक्रयणे यत्साधकतमं कारकं तदन्यतरस्यां संप्रदा
नसंज्ञं भवति। परिक्रयणं वेतनादिना नियतकालं स्वीकरणं नात्यंतिकः क्रय एव। शताय परिक्रीतोनुब्रूहि। श
तेन परिक्रीतोनुब्रूहि। सहस्राय परिक्रीतोनुब्रूहि। सहस्रेण परिक्रीतोनुब्रूहि॥४४॥ ॥आधारोधिकरणम्
॥ ॥आध्रियंते यस्मिन्क्रिया इत्याधारः कर्तृकर्मणोः क्रियाश्रयभूतयोर्धारणात्क्रियां प्रति य आधारस्तत्का
रकमधिकरणसंज्ञं भवति। कटे आस्ते। शकटे आस्ते। स्थाल्यामोदनं पचति। अधिकरणप्रदेशाः। सप्तम्यधिक
रणे चेत्येवमादयः॥४५॥ ॥अधिशीङ्स्थासां कर्म॥ ॥पूर्वेण अधिकरणसंज्ञायां प्राप्तायां कर्मसंज्ञा वि
धीयते। अधिपूर्वाणां शीङ्स्थासां। इत्येतेषामाधारो यस्तत्कारकं कर्मसंज्ञं भवति। ग्राममधिशेते।

४५

माद्दूर्ष्या। गुणेषु दोषाविष्करणमसूया। क्रुधाद्यर्थानां धातूनां प्रयोगे यं प्रति कोपस्तत्कारकं संप्रदानसंज्ञं भवति
।क्रोधस्तावत्कोप एव। द्रोहादयोपि कोपप्रभवा एव गृह्यंते। तस्मात्सामान्येन विशेषणं यं प्रति कोप इति। देवद
त्ताय क्रुध्यति। देवदत्ताय द्रुह्यति। देवदत्तायेर्ष्यति। देवदत्तायासूयति। यं प्रति कोप इति किं। भार्यामीर्ष्यति। मै
नामन्यो द्राक्षीदिति॥३७॥ ॥क्रुधद्रुहोरुपसृष्टयोः कर्म॥ ॥पूर्वेण संप्रदानसंज्ञायां प्राप्तायां कर्मसंज्ञा वि
धीयते। क्रुधद्रुहोरुपसृष्टयो रुपसर्गसंबद्धयो यं प्रति कोपस्तत्कारकं कर्मसंज्ञं भवति। देवदत्तमभिक्रुध्यति। दे
वदत्तमभिद्रुह्यति। उपसृष्टयोरिति किम्। देवदत्ताय क्रुध्यति। देवदत्ताय द्रुह्यति॥३८॥ ॥राधीक्ष्योर्यस्य विप्र
श्नः॥ ॥राधेरीक्षेश्च कारकं संप्रदानसंज्ञं भवति। कीदृशं। यस्य विप्रश्नः। विविधः प्रश्नो विप्रश्नः। स कस्य भव
ति। यत्संबंधि शुभाशुभं पृच्छ्यते। देवदत्ताय राध्यति। देवदत्तायेक्षते। नैमित्तिकः पृष्टः सन् देवदत्तस्य दैवं पर्या
लोचयतीत्यर्थः॥३९॥ ॥प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता॥ प्रत्याङ्पूर्वस्य श्रृणोतेः कारकं संप्रदानसंज्ञं भवति।
कीदृशं। पूर्वस्य कर्ता। प्रतिपूर्वस्य आङ्पूर्वस्य च श्रृणोतिः प्रतिज्ञाने अभ्युपगमे वर्त्तते। स चाभ्युपगमः परेण प्र
युक्तस्य सतो भवति। तत्र प्रयोक्ता पूर्वस्याः क्रियायाः कर्त्ता संप्रदानसंज्ञो भवति। देवदत्ताय गां प्रतिश्रृणोति। दे
वदत्ताय गामाश्रृणोति। यज्ञदत्ताय गामाश्रृणोति। प्रतिजानात इत्यर्थः॥४०॥ ॥अनुप्रतिगृणश्च॥ ॥पूर्वस्य क
र्त्तेति वर्त्तते। अनुपूर्वस्यं पूर्वस्य च गृणतेः कारकं पूर्वस्याः क्रियायाः कर्तृभूतं संप्रदानसंज्ञं भवति। अहोत्रे अनु

प्रति

४५

५०

४६

ग्राममधितिष्ठति। पर्वतमध्यास्ते॥४६॥ ॥अभिनिविशश्च॥ ॥अभिनिपूर्वस्य विशतेराधारो यस्तत्कारकं कर्म
संज्ञं भवति। ग्राममभिनिविशते। पर्वतमभिनिविशते। कथं कल्याणेऽभिनिवेशः पापेऽभिनिवेशः पापासंज्ञा
यस्मिन् अभिनिविशत इति। अन्यतरस्यामिति वर्त्तते। परिक्रयणे संप्रदानमन्यतरस्यामित्यतः सा च व्यवस्थि
तविभाषा विज्ञायते॥४७॥ ॥उपान्वध्याङ्वसः॥ ॥उप अनु अधि आङ् इत्येवं पूर्वस्य वसतेराधारो यस्तत्का
रकं कर्मसंज्ञं भवति। ग्राममुपवसति। सेनामनुवसति। ग्राममधिवसति। ग्राममावसति। वसेरशयर्थस्य प्र
तिषेधो वक्तव्यः। ग्रामे उपवसति। भोजननिवृत्तिं करोतीत्यर्थः॥४८॥ ॥कर्त्तुरीप्सिततमं कर्म॥ ॥कर्त्तुः क्रिय
या यदाप्तुमिष्टतमं तत्कारकं कर्मसंज्ञं भवति। ओदनं पचति। कटं करोति। ग्रामं गच्छति। कर्त्तुरिति किम्। माषेष्वश्वं
बध्नाति। कर्मण ईप्सिता माषाः न कर्त्तुः॥ तमब्ग्रहणं किं। पयसा ओदनं भुंक्ते। कर्म इत्यनुवर्त्तमाने पुनः क
र्मग्रहणमाधारनिवृत्यर्थम्। इतरथा आधारस्यैव हि स्यात्। गेहं प्रविशतीति। सक्तून् पिबति। ओदनं पचतीत्येव
मादिषु न स्यात्। पुनः कर्मग्रहणात् सर्वत्र सिद्धं भवति। कर्मप्रदेशाः कर्मणि द्वितीयेत्येवमादयः॥४९॥ ॥तथा
युक्तं चानीप्सितं॥ ॥येन प्रकारेण कर्त्तुरीप्सितं क्रियया युज्यते तेनैव चेत्प्रकारेण तदनीप्सितमपि युक्तं भवति। तस्य
कर्मसंज्ञा विधीयते। ईप्सितादन्यत् सर्वमनीप्सितं। द्वेष्यमितरच्च। विषं भक्षयति। चोरान् पश्यति। ग्रामं गच्छन् वृक्ष
मूलान्युपसर्पति॥ ॥५०॥ ॥अकथितं च॥ ॥अकथितं च यत्कारकं तत् कर्मसंज्ञं भवति। केनाकथितं। अपादा

४६

नादिभिर्विशेषकथाभिः परिगणनं कर्त्तव्यं। दुहियाचिरुधिप्रछिभिक्षिचित्रामुपयोगनिमित्तमपूर्वविधौ। ब्रुवि
शासिगुणेन च यत्सचते तदकीर्त्तितमाचरितं कविना। सुपठंज्यत इत्युपयोगः। पयः प्रभृतिस्तस्य निमित्तं गवा
दिस्तस्योपयुज्यमानपयः प्रभृतिनिमित्तस्य गवादेः कर्म्मसंज्ञा विधीयते। पाणिनाकांस्यपात्र्यां गां दोग्धि पय
इति। पाण्यादिकमप्युपयोगनिमित्तं तस्य कस्मान्न भवति। नैतदस्ति विहितात्र करणादिसंज्ञा तदर्थमाह। अ
पूर्वविधाविति। ब्रुविशासिगुणेन च यत्सचते। ब्रुविशास्योर्गुणेन ब्रुविशासिगुणेन क्रियासाधनं प्रधानं कर्म्म धर्म्मा
दिकं। तेन च यत्सचते यत्संबध्यते। तदकीर्त्तितमाचरितं कविना। तदकथितं मुक्तं सूत्रकारेण। दुहि। गां दोग्धि पयः।
याचि। पौरवं गां याचते। रुधि। गामवरुणद्धि व्रजं। प्रछि। माणवकं पंथानं पृच्छति। भिक्षि। पौरवं गां भिक्षते। चिञ्।
वृक्षमवचिनोति फलानि। ब्रुवि। माणवकं। माणवकं धर्म्मं ब्रूते शासि। माणवकं धर्म्ममनुशास्ति।।५१।। ।।ग
तिबुद्धिप्रत्यवसानार्थशब्दकर्म्माकर्म्मकाणामणिकर्त्ता स णौ।। ।।अर्थः शब्दः प्रत्येकमभिसंबध्यते। गत्यर्था
नां बुद्ध्यर्थानां प्रत्यवसानार्थानां च धातूनां तथा शब्दकर्म्मकाणामकर्म्मकाणां चाण्यन्तानां कर्म्मसंज्ञो भवति। गछ
ति माणवको ग्रामं। गमयति माणवकं ग्रामं। याति माणवको ग्रामं। यापयति माणवकं ग्रामं। गत्यर्थेषु नीवह्योः
प्रतिषेधो वक्तव्यः। नयति भारं देवदत्तः। नाययति भारं देवदत्तेन। वहति भारं देवदत्तः। वाहयति भारं देव
दत्तेन। वहेरनियंतृकर्त्तृकस्येति वक्तव्यम्। इह प्रतिषेधो माभूत्। वहंति यवान् बलीवर्दाः। वाहयति यवान्

द इति। किं दर्शयति चैत्रं मैत्रमपरः। प्राप्तविकल्पत्वात् द्वितीयैव। अभिवादयति गुरुं माणवकेन पिता। अप्रा
प्तविकल्पत्वात्तृतीयैव।।५३।। ।।स्वतंत्रः कर्त्ता।। ।।स्वतंत्र इति प्रधानभूत उच्यते। अगुणभूतो यः क्रियाप्रसिद्धौ
स्वातंत्र्येण विवक्षितोर्थः तत्कारकं कर्त्तृसंज्ञं भवति। देवदत्तः पचति। स्थाली पचति। कर्त्तृप्रदेशाः। कर्त्तृकरणयो
स्तृतीयेत्येवमादयः।।५४।। ।।तत्प्रयोजको हेतुश्च।। ।।तदित्यनेनांतरः कर्त्ता संबध्यते। तस्य प्रयोजकस्तत्प्रयोज
को निपातनात्समासः। स्वतंत्रस्य प्रयोजको योर्थस्तत्कारकं हेतुसंज्ञं भवति। चकारात्कर्त्तृसंज्ञं च। कर्त्तृसंज्ञासमा
वेशार्थश्चकारः। कुर्वाणं प्रयुंक्ते कारयति। हारयति। हेतुत्वाभिधानिमित्तं। कर्त्तृत्वाच्च कर्त्तृसंज्ञाप्रवैत्ययेनोच्य
ते। हेतुप्रदेशाः। हेतुमति चेत्येवमादयः।।५५।। ~~।।तत्प्रयोजको हेतुश्च।।~~ ।।प्राग्रीश्वरान्निपाताः।। ।।अधिरीश्वर इ
ति वक्ष्यति। प्रागेतस्मादवधेर्यानित ऊर्ध्वमनुक्रमिष्यामः निपातसंज्ञास्ते वेदितव्याः। वक्ष्यति। चादयोऽसत्वे। च। वा।
ह। अह। प्राग्वचनं संज्ञासमावेशार्थं। गत्युपसर्गकर्म्मप्रवचनीयसंज्ञाभिः। सह निपातसंज्ञा समाविशति। रे
फोच्चारणं समीश्वरे तोसुन्कसुनादित्ययमवधिर्मा विज्ञायीति। रीश्वरात्। ईश्वरा माभूत्। तकतोर्जतः परोपि सः।
समासे चाव्ययीभावो लौकिकं चातिवर्त्तते।।५६।। ।।चादयोऽसत्वे।। ।।चादयो निपातसंज्ञा भवंति न चेत्सत्वे वर्त्तंते।
प्रसज्यप्रतिषेधोयं। सत्वमिति च द्रव्यमुच्यते। च। वा। ह। अह। एव। एवम्। नूनम्। शश्वत्। युगपत्। सूपत्। युगपत्। क्ष
पत्। कुवित्। चेण। नेत्। चेत्। चण्। कच्चित्। यत्र। न। ह। हंत। वामा। किम्। माङ्। माङो ङकारो विशेषणार्थः। माकिः।

४७

बलीवर्द्दान्। इति गत्यर्थाः। बुध्यते माणवको धर्म्मं। बोधयति माणवकं धर्म्मम्। वेत्ति माणवको धर्म्मम्। वेदयति
माणवकं धर्म्मम्। इति बुद्ध्यर्थाः। प्रत्यवसानमभ्यवहारः। भुंक्ते माणवक ओदनं। भोजयति माणवकमोदनं। अ
श्नाति माणवक ओदनं। आशयति माणवकमोदनं। आदिखाद्योः प्रतिषेधो वक्तव्यः। अत्ति माणवक ओदनं। आ
दयति माणवकेनोदनं। खादति माणवकः। खादयति माणवकेन। भक्षेरहिंसार्थस्य प्रतिषेधो वक्तव्यः। भक्षय
ति पिंडीं देवदत्तः। भक्षयति पिंडीं इति देवदत्तेन। अहिंसार्थस्येति किम्। भक्षयंति बलीवर्द्दाः सस्यं। भक्षयंति ब
लीवर्द्दान् सस्यं इति प्रत्यवसानार्थाः। अधीते माणवको वेदं। अध्यापयति माणवकं वेदं। पठति माणवको वे
दं। पाठयति माणवकं वेदं। इति शब्दकर्म्मकाणां। आस्ते देवदत्तः। आसयति देवदत्तं। शेते देवदत्तः। शायय
ति देवदत्तं। अकर्म्मकाणां। एषामिति किम्। पचत्योदनं देवदत्तः। पाचयत्योदनं देवदत्तेन। अण्यन्तानामिति किं।
गमयति देवदत्तो यज्ञदत्तं तमपरः प्रयुंक्ते। गमयति देवदत्तेन यज्ञदत्तं विष्णुमित्रः॥ ५२॥ ॥ हृक्रोरन्यतर
स्याम्॥ ॥ अणिकर्त्ता णाविति वर्त्तते। हरतेः करोतेश्चाण्यंतयोर्यः कर्त्ता स ण्यंतयोरन्यतरस्यां कर्म्मसंज्ञो
भवति। हरति भारं माणवकः। हारयति भारं माणवकं माणवकेनेति वा। करोति कटं देवदत्तः। कारयति क
टं देवदत्तं देवदत्तेनेति वा। अभिवादिदृशोरात्मनेपदे उपसंख्यानम्। अभिवदति गुरुं देवदत्तः। अभिवा
दयते गुरुं देवदत्तं देवदत्तेनेति वा। पश्यंति भृत्या राजानं। दर्शयते भृत्यान् राजा भृत्यैरिति वा। आत्मनेप

४७

श्री०

४८

लुङिति इह न भवति। माश्च वत्। मा करिष्यति। नञ्। तावत्। यावत्। त्वा। त्वे। त्वै। रै। श्रौषट्। वौषट्। वषट्। स्वाहा।
स्वधा। ओम्। तथा। हि। खलु। किं। किल। अथ। अव। धैं अम्। स्म। स्मि। अ। इ। उ। ऋ। लृ। ए। ऐ। ओ। औ। दह। उ
ञ्। उकञ्। अदल्। आतंक। वेलायां। यात्रायां। मात्रायाम्। यथा। तथा। किम्। यत्। तत्। पुरा। धिक्। वधा। धिक्। ब
त। हाहा। हेहे। फाट्। प्याट्। आहो। उताहो। हो। अहो। नो। ननु। मन्ये। मिथ्या। असि। ब्रूहि। तुनु। इति। इव। वम।
घटवत्। वात्। अम्। आम्। इववत्। शंवत्। शांशिकम्। समहिकम्। हिरुक्। शुकम्। अनुकम्। सत्यम्। ऋतम्।
इद्धा। अद्धा। मुधावत्। न चेत्। नो चेत्। नहि। जातु। कथं। कुतः। कुत्र। अव। अंतः। हाहे। हेहा। इहो। आहोस्वित्।
शं। कं। खं। द्योः। दिष्ट्या। पशु। फट्। सह। अनुषक्। अंगफक्। आतक्। ताजक्। अये। अरे। अलवट्। वेट्। वाट्।
कुम्। खुम्। घुं। ङुम्। रोचित्। पर्य्या। ईम्। जम्। काम्। शीन्। सीम्। वै। उपसर्गविभक्तिस्वरप्रतिरूपकाश्च निपा
ताः। उपसर्गप्रतिरूपकाः। अवदत्तं विदत्तं प्रदत्तं वादिकर्म्मणि। निदत्तमनुदत्तं च सुदत्तमपि चेष्यते। अव उपस
र्गात् इति तत्वं न भवति। दुर्नीतम्। दुर्नयः। उपसर्गादिति णत्वं न भवति। असत्व इति किम्। पशुर्वै पुरुषः।
पशुः पुरोडाशः। निपातप्रदेशाः स्वरादिनिपातमव्ययमित्येवमादयः॥ ५७॥ प्रादयः॥ प्रादयो सत्वे निपातसं
ज्ञा भवति। प्र। परा। अप। सम्। अनु। अव। निस्। दुस्। दुर्। वि। आङ्। नि। अधि। अपि। अति। सु। उत्। अभि।
प्रति। परि। उप। पृथग्योगकरणमुत्तरसंज्ञाविशेषणार्थं। उपसर्गाः क्रियायोग इति चादीनामुपसर्गसंज्ञामा

४८

निमू

भूत्। असत्व इत्येव। पराः सेनाः॥५८॥ ॥उपसर्गाः क्रियायोगे॥ ॥प्रादयः क्रियायोगे उपसंज्ञा भवंति। प्रणयति
परिणयति। प्रणायकः। परिणायकः। क्रियायोग इति किं। प्रगतो नायकोऽस्मात् देशात्। प्रनायको देशः। मरुच्छब्द
स्योपसंख्यानं। मरुद्भिर्दत्तो मरुत्तः। संज्ञाविधानसामर्थ्यादनंतत्वेपि अच उपसर्गात्त इति त्वं भवति। श्रच्छब्दस्यो
पसंख्यानं। तत आतश्चोपसर्ग इत्यङ् भवति। श्रद्धा। उपसर्गप्रदेशाः। उपसर्गे घोः किरित्येवमादयः॥५९॥ ॥ग
तिश्च॥ ॥गतिसंज्ञकाश्च प्रादयो भवंति क्रियायोगे। प्रकृत्य। प्रकृतं। यत्प्रकरोति। योगविभाग उत्तरार्थः। उत्तरत्र
गतिसंज्ञैव यथा स्यात्। उपसर्गसंज्ञा माभूत्। ऊरीस्यादित्यत्रोपसर्गप्रादुर्भ्यामस्तिर्यच्पर इति षत्वं प्रसज्ये
त। चकारः संज्ञासमावेशार्थः। प्राणीतं। गतिरनंतर इति स्वरः। उपसर्गादिति च षत्वणत्वे भवतः। कारिकाशब्द
स्योपसंख्यानं। कारिकाकृत्य। कारिकाकृतं। यत्कारिकाकरोति। पुनश्च नसोश्छंदसि गतिसंज्ञो भवत इति वक्तव्यं
। पुनरुत्स्यूतं वासो देयं। गतिर्गता विति धातो भवति। चनोहितः। गतिरनंतरः। गतिप्रदेशाः कुगतिप्रादयः इत्येव
मादयः॥६०॥ ॥ऊर्यादिच्विडाचश्च॥ ॥ऊर्यादयः शब्दाः च्व्यंताः डाजंताश्च क्रियायोगे गतिसंज्ञा भवंति। च्विडाचोः
कृभ्वस्तियोगे विधानं तत्साहचर्यादूर्यादीनामपि तैरेव योगे गतिसंज्ञा विज्ञायते। ऊरी उररी शब्दावंगीकरणे
विस्तारे च। ऊरीकृत्य। ऊरीकृतं। यदूरीकरोति। यदूरीकृतं। उररीकृत्य। उररीकृतम्। यदुररीकृतम्। यदुररीक
रोति। पापी। ताली। आताली। वेताली। धूसी। शकला। संशकला। ध्वंसकला। भ्रंसकला। एते शकलादयो हिंसा

कृत्वेत्यर्थः। उपयमन इति किम्। हस्ते कृत्वा कार्षापणं गतः॥७७॥ ॥प्राध्वं बंधने॥ ॥कृञिति वर्त्तते। प्राध्वमिति म
कारांतमव्ययमानुकूल्ये वर्त्तते। तदानुकूल्यं बंधनहेतुकं यदा भवति तदा प्राध्वंशब्दः कृञि नित्यं गतिसंज्ञो भवति।
प्राध्वंकृत्य। यत्प्राध्वंकरोति। बंधन इति किं। प्राध्वं कृत्वा शकटं गतः॥७८॥ ॥जीविकोपनिषदावौपम्ये॥ ॥कृञिति व
र्त्तते। जीविका उपनिषदित्येतौ शब्दौ औपम्ये विषये कृञि नित्यं गतिसंज्ञौ भवतः। जीविकाकृत्य। उपनिषत्कृत्य। औ
पम्य इति किम्। जीविकां कृत्वा गतः॥७९॥ ॥ते प्राग्धातोः॥ ॥ते गत्युपसर्गसंज्ञकाः प्राक् एव धातोः प्रयोक्तव्याः।
तथा चैवोदाहृताः। ते ग्रहणमुपसर्गार्थं। गतयो ह्यनंतराः॥८०॥ ॥छन्दसि परेपि॥ ॥प्राक्प्रयोगे प्राप्ते छंद
सि परेप्यनुज्ञायंते। छंदसि विषये गत्युपसर्गसंज्ञकाः पर्वे परेपि प्रयोक्तव्याः। न च परेण तेषां प्रयुज्यमानानां
संज्ञाकार्यं किंचिदस्ति। केवलं तु परप्रयोगेपि क्रियायोग एषामस्तीति ज्ञाप्यते। याति निहस्तिना। नियाति ह
स्तिना। हंति निमुष्टिना। निहंति मुष्टिना॥८१॥ ॥व्यवहिताश्च॥ ॥व्यवहिताश्च गत्युपसर्गसंज्ञकाः छंदसि
दृश्यंते। आ मंद्रैरिंद्र हरिभिर्याहि मयूररोमभिः॥ आयाहि॥८२॥ ॥कर्मप्रवचनीयाः॥ ॥कर्मप्रवचनीया
इत्यधिकारो वेदितव्यः। यानित ऊर्ध्वमनुक्रमिष्यामः कर्मप्रवचनीयासंज्ञास्ते वेदितव्याः। अधिरीश्वर इति या
वत्। वक्ष्यति। अनुर्लक्षणे। शाकल्यस्य संहितामनुप्रावर्षत्। कर्मप्रवचनीयप्रदेशाः कर्मप्रवचनीययु
क्ते द्वितीयेत्येवमादयः॥८३॥ ॥अनुर्लक्षणे॥ ॥अनुशब्दो लक्षणे द्योत्ये कर्मप्रवचनीयसंज्ञो भवति। शाकलस्य

४९

यां। शकलाकृत्य। संशकलाकृत्य। ध्वंसकलाकृत्य। भ्रंसकलाकृत्य। गुलुगुधा पीडार्थे। गुलुगुधाकृत्य। सजूः
सहार्थे। सजूःकृत्य। फलूः फली। विक्ली आक्ली इति विकारे। फलूकृत्य। फलीकृत्य। विक्लीकृत्य। आक्लीकृ
त्य। आलाष्टी। केवासी। केवाली। शेवाली। सेवाली। पर्याली। वर्षाली। वअस्मसा। वस्मसा। मसमसा। एते हिंसा
याम्। श्रौषट्। वौषट्। वषट्। स्वाहा। स्वधा। प्रादुस्। अविस्। श्रंताः स्वत्यपि। श्रुक्लीकृत्य। श्रुक्लीकृतं। यच्छ्रु
क्लीकरोति। डाचः। पटपटाकृत्य। पटपटाकृतं। यत्पटपटाकरोति।।६१।। ।।अनुकरणं चानितिपरम्।। ।।इतिपरो
यस्मात् इति बहुव्रीहिः। अनुकरणम् अनितिकं क्रियायोगे गतिसंज्ञं भवति। खाट्कृत्य। खाट्कृतम्। यत्खाट्करोति।
अनितिपरमिति किं। खाडिति कृत्वा निरष्ठीवत्।।६२।। ।।आदरानादरयोः सदसती।। ।।प्रीतिसंभ्रम आदरः। परि
भवो औदासीन्यमनादरः। आदरानादरयोर्यथाक्रमं सदसच्छब्दौ गतिसंज्ञौ भवतः। सत्कृत्य। सत्कृतं। यत्सत्करोति
। असत्कृत्य। असत्कृतं। आदरानादरयोरिति किं। सत्कृत्वा कांडं गतः। असत्कृत्वा कांडं गतः।।६३।। ।।भूषणेऽ
लं।। ।।अलमिति प्रतिषेधे सामर्थ्ये पर्याप्तौ भूषणे चेति विशेषणमुपादीयते। भूषणे योऽलंशब्दः स गतिसंज्ञो भ
वति। अलंकृत्य। अलंकृतम्। यदलंकरोति। भूषण इति किं। अलं भुक्त्वा ओदनं गतः।।६४।। ।।अंतरपरिग्रहे
।। ।।अंतःशब्दो अपरिग्रहेर्थे गतिसंज्ञो भवति। परिग्रहः स्वीकरणं तदभावे गतिसंज्ञा विधीयते। अंतर्हत्य
अंतर्हतं। यदंतर्हंति। अपरिग्रह इति किं। अंतर्हत्वा मूषिकां श्येनो गतः। परिगृह्य गत इत्यर्थः। शब्दस्याङ्

अंतः

४९

५९

संहितामनुप्रावर्षत्। अनडुह्यत्तमन्वसिचत्। अगस्त्यमन्वसिचत् प्रजाः। किमर्थमिदमुच्यते। यावता लक्षणेत्थं
भूताख्यानभागवीप्सासु प्रतिपर्यनव इत्यनेन सिद्धे वानोः कर्मप्रवचनीयसंज्ञा। हेत्वर्थं तु वचनं। हेतुतृतीयां बाधि
त्वा द्वितीये वयथा स्यात्।।८४।। ।।तृतीयार्थे।। ।।अनुशब्दस्तृतीयार्थे द्योत्ये कर्मप्रवचनीयसंज्ञो भवति। नदीम
न्वसितासेना। पर्वतमन्वसितासेना। पर्वतेन सह संबद्धेत्यर्थः।।८५।। ।।हीने।। ।।हीन इति न्यून उच्यते। स उ
त्कृष्टापेक्षः। तेनेयं हीनोत्कृष्टसंबंधे संज्ञा विधीयते हीने द्योत्ये ऽनुः कर्मप्रवचनीयसंज्ञो भवति। अन्वर्जुनं यो
द्धारः। अनुशाकटायनं वैयाकरणाः।।८६।। ।।उपोऽधिके च।। ।।उपशब्दोऽधिके हीने च द्योत्ये कर्मप्रवचनीय
संज्ञो भवति। उपखार्यां द्रोणः। उपनिष्के कार्षापणं। हीने। उपशाकटायनं वैयाकरणाः।।८७।। ।।अपपरी
वर्जने।। ।।अपपरिशब्दौ वर्जने द्योत्ये कर्मप्रवचनीयसंज्ञौ भवतः। प्रकृतेन संबंधिना कस्यचिदनभिसंबं
धो वर्जनं। अपत्रिगर्तेभ्यो वृष्टो देवः। परित्रिगर्तेभ्यो वृष्टो देवः। वर्जन इति किं। ओदनं परिषिंचति।।८८।।
।। ।।आङ्मर्यादावचने।। ।।आङित्येष शब्दो मर्यादावचने कर्मप्रवचनीयसंज्ञो भवति। अवधिर्मर्यादा।
वचनग्रहणादभिव्याप्तिः परिगृह्यते। आपाटलिपुत्राद्वृष्टो देवः। आकुमारं यशः पाणिनेः। आसांकाश्या
त्। आमथुरायाः। मर्यादावचन इति किम्। ईषदर्थे क्रियायोगे योर्मभूत्।।८९।। ।।लक्षणेत्थंभूताख्यानभाग
वीप्सासु प्रतिपर्यनवः।। ।।लक्षणेत्थंभूताख्यानभागवीप्सायां च विषयभूतायां प्रति परि अनु इत्येते क

५९

कर्मप्रवचनीयसंज्ञा भवंति। लक्षणे तावत्। वृक्षं प्रति विद्योतते विद्युत्। वृक्षं परि। वृक्षमनु। इत्थंभूताख्याने।
साधुर्देवदत्तो मातरं प्रति। मातरं परि। मातरमनु। भागे। यदत्र मां प्रति स्यात्। मां परि। मामनु। वीप्सायाम्। वृक्षं
वृक्षं प्रति सिंचति। परिसिंचति। अनुसिंचति। लक्षणादिष्विति किम्। ओदनं परिसिंचति। अथ परिशब्दयोगे पंच
मी कस्मान्न भवति। पंचम्यपाङ्परिभिरिति। वर्ज्जनविषये सा विधीयते। अपशब्दस्साहचर्यात्॥ ९०॥ ॥अभि
रभागे॥ ॥ लक्षणादिष्वेव भागवर्जितेषु अभिः कर्मप्रवचनीयसंज्ञो भवति। वृक्षमभि विद्योतते विद्युत्। सा
धुर्देवदत्तो मातरमभि। वृक्षंवृक्षमभि सिंचति। अभाग इति किम्। भागः स्वीक्रियमाणोंशः। यदत्र मामभि
ष्यात् तदीयतां। यदत्र ममभवति तद्दीयतां॥ ९१॥ ॥प्रतिः प्रतिनिधिप्रतिदानयोः॥ ॥मुख्यसदृशः प्रतिनि
धिः। दत्तस्य प्रतिनिर्य्यातनं प्रतिदानं। प्रतिनिधिविषये प्रतिदानविषये च। प्रतिः कर्मप्रवचनीयसंज्ञो भवति
। अभिमन्युरर्ज्जुनतः प्रति। माषानस्मै तिलेभ्यः प्रतियच्छति॥ ९२॥ ॥अधिपरी अनर्थकौ॥ ॥अधिपरिशब्दौ
अनर्थकौ अनर्थान्तरवाचिनौ कर्मप्रवचनीयसंज्ञौ भवतः। कुतोध्यागच्छति। कुतः पर्य्यागच्छति। अनर्थकावि
ति यस्संनिकृष्टेतदर्थकावित्यर्थः। कुत आगच्छतीत्यर्थः। गत्युपसर्गसंज्ञाबाधनार्था कर्मप्रवचनीयसंज्ञा वि
धीयते॥ ९३॥ ॥सुः पूजायाम्॥ ॥सुशब्दः पूजायामर्थे कर्म्मप्रवचनीयसंज्ञो भवति। सुसिक्तं भवता। सुस्तु
तं भवता। धात्वर्थः स्तूयते। उपसर्गसंज्ञाभावात् षत्वं न भवति। पूजायामिति किम्। सुषिक्तं किं तवात्र॥ ९४॥ ॥

त्तमविषयादन्यत्रोच्यते। यत्र युष्मदस्मदी समानाधिकरणे न स्तस्तत्र शेषे प्रथमः पुरुषो भवति। पचति। प
चतः। पचंति॥ १०८॥ ॥परः संनिकर्षः संहिता॥ ॥परशब्दोतिशयार्थे वर्त्तते। सन्निकर्षः प्रत्यासत्तिः।
परो यः संनिकर्षो वर्णानामर्द्धमात्राकालव्यवधानः स संहितासंज्ञो भवति। दध्यत्र। मध्वत्र। संहिताप्रदेशाः
स्वरितात्संहितायामित्येवमादयः॥ ॥१०९॥ ॥विरामोवसानं॥ ॥विरतिर्विरामो विरम्यतेनेनेति वा वि
रामः। सोऽवसानसंज्ञो भवति। वृक्षः। प्लक्षः। अवसानप्रदेशाः। खरवसानयोर्विसर्ज्जनीय इत्येवमादयः
॥११०॥ ॥एवं सूत्र ३३६॥ इत्युपसंख्यानवती शुद्धगणा विवृतगूढसूत्रार्था व्युत्पन्नरूपसिद्धिर्वृत्तिरि
यं काशिका नाम॥ ॥इति श्रीजयादित्यकाशिकायां वृत्तौ प्रथमाध्यायस्य चतुर्थः पादः॥ ॥श्री॥ ॥
॥ ॥इति प्रथमोध्यायः॥ ॥ ॥श्री॥ ॥श्री॥ ॥

शि॰
२
५२

॥अतिरतिक्रमणेच॥ ॥अतिशब्दः अतिक्रमणे च कारात् पूजायां च कर्मप्रवचनीयसंज्ञो भवति। निष्पन्नेपि
फले क्रियाशक्तिरतिक्रमणं। अतिसिक्तमेव भवता। अतिस्तुतमेव भवता। पूजायाम्। अतिसिक्तं भवता। अति
स्तुतं भवता। शोभनं कृतमित्यर्थः॥९५॥ ॥अपिः पदार्थसंभावनान्ववसर्गगर्हासमुच्चयेषु॥ ॥पदार्थसंभाव
नेऽन्ववसर्गगर्हायां समुच्चये वर्त्तमानोऽपिशब्दः कर्मप्रवचनीयसंज्ञो भवति। पदांतरस्याप्रयुज्यमानस्यार्थः प
दार्थः। सर्पिषोऽपि स्यात्। मधुनोऽपि स्यात्। मात्राबिंदुः स्तोकमित्यस्यार्थेऽपिशब्दो वर्त्तते। संभावनमधिकार्थव
चनेन शक्तेरप्रतिघातविष्करणम्। अपि सिंचेन्मूलसहस्रम्। अपि स्तुयाद्राजानम्। अन्ववसर्गः कामचारा
नुज्ञानम्। अपि सिंच। अपि स्तुहि। गर्हा निंदा। धिग्जाल्मं देवदत्तम्। अपि सिंचेत्पलांडुम्। अपि स्तुयाद्वृषलं। स
मुच्चये। अपि सिंच। अपि स्तुहि। सिंच च। स्तुहि च। उपसर्गसंज्ञाबाधनात् षत्वं न भवति॥९६॥ ॥अधिरीश्वरे।
॥ ॥ईश्वरः स्वामी॥ स च स्वमपेक्षिते। तदर्यं स्वस्वामिसंबंधे अधिः कर्मप्रवचनीयसंज्ञो भवति। तत्र कदाचित्
स्वामिनः कर्मप्रवचनीयविभक्तिः सप्तमी भवति। कदाचित्स्वात्। अधिब्रह्मदत्ते पंचालाः। अधिपंचालेषु ब्रह्मद
त्तः॥९७॥ ॥विभाषाकृञि॥ ॥अधिः करोतौ विभाषा कर्मप्रवचनीयसंज्ञो भवति। यदत्र मामधिकरिष्यति।
कर्मप्रवचनीयसंज्ञापक्षे गतिसंज्ञाबाधनात्तिङि चोदात्तवतीति निघातो न भवति॥९८॥ ॥लः परस्मैपदम्
॥ ॥लडितिषष्ठी आदेशापेक्षा। लादेशाः परस्मैपदसंज्ञा भवंति। तिप्। तस्। झि। सिप्। थस्। थ। सिप्। वस्।

५२

५५

५४

MY 7

(p. 1625/2)

from PSu to 1.2.30

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

ल ह्म स्त्रि ऊं॰ त रस्मा स्त्रि ऊ ला कृ त का त प वा के यका यी दा त्त व वा॰ तो [illegible] म घी ल्ल का त ड प द रस न तै ठ व ल [illegible] ना म

[illegible] वै॰ [illegible] वा नि ति य ज्ञा रा [illegible] म सा ग रा का तु प॰ त र क क त ता रस्मा व सा ग [illegible] वा तै । प [illegible] र स्मा व ल्ल का त र स्मा

व ल त वा र हि त ग [illegible] ॰ त म न्नों ग क तो [illegible] कु मां प ल त का इ [illegible] ॥—॥ प [illegible] ॥—॥ प [illegible] तै व ता [illegible] प द र

॥ प [illegible] ॥—॥ प [illegible] इ तौ तौ व ता [illegible] प द र स पु व [illegible] ॰ तै च का त [illegible] ॰ क तो [illegible] का घी त र स्मा [illegible]

[illegible] य व [illegible] तो का तै ता । प [illegible] वा या व इ तौ का तै ता । व [illegible] त्रा तै [illegible] तै का तै ता । प त ता [illegible] तै [illegible] ॰ ला वा॰ क घ

व ता॰ त त र [illegible] ता का त य र [illegible] त का य॰ न त्त त तो [illegible] या [illegible] का प तो [illegible] तै न प त र ठ [illegible] घ क त

[illegible] का तै [illegible] ति [illegible] ॰ क त [illegible] ॰ ॥—॥ [illegible] य व त [illegible] [illegible] य व त इ तौ त [illegible]

[illegible] ता॰ त व तौ [illegible] रा [illegible] का तै ता । [illegible] ॰ तै प । [illegible] का ता तु प त ड प द र स तै । त र स य तु [illegible] ता य [illegible] त [illegible]

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

8

9

10

11

12

13

MY 10
(P. 6482/2)

[illegible]
[illegible]
[illegible]
[illegible] विना। नाना। [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

2

[illegible]

1

[illegible]

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

[illegible]

[illegible]

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

[illegible]
[illegible]
[illegible]
[illegible]


[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]


[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

















[illegible]
[illegible]

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

[illegible]
[illegible]

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

[illegible]
[illegible]

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

[illegible]
[illegible]

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]



[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

[illegible]
[illegible]
[illegible]

[illegible]

[illegible]

[illegible]

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

[illegible]

[illegible]

[illegible]



[illegible]

[illegible]

[illegible]

MY 2

BEGINNING OF 1.3

IN SEQUENCE

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]





LAST 2 IN SEQUENCE

PLUS OTHERS TO BE IDENTIFIED

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]


[illegible]

[illegible]

[illegible]

[illegible]

[illegible]


END OF 1.3
IN SEQUENCE







MY 16

(P. 9941)

3

4

5

9

10

11

12

13

14

15

16

17

18

19

20

21

22

23

24

[illegible]

25

[illegible]

26

[illegible]

27

28

29

30

31

32

[illegible]

83

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]